प्रवेश सं० १८१८३ विषयः पुराणेतिहासम् क्रम सं०

नाम कार्तिकमासमाहात्म्यम् (पद्मपुराणस्थम्) ग्रन्थकार

पत्र सं० १-४८

श्लोक सं० अक्षर सं० (पंक्तौ) ४२ पंक्ति सं० (पृष्ठे) ८

आकार: १०.५ १/२" × ३.९" लिपि: दे. ना. आधार: क.

वि० विवरणम् पू० 14460

नं. ३७५८

पी० एस० यू० पा०—७७ एम० सी० ई०—१६५१—५० ०००

Indira Gandhi National Centre for the Arts

महीधरसंग्रहे- ४६३

श्रीगणेशायनमः॥

१

श्रीगणेशाय नमः ॥ नारायणं नमस्कृत्यं नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥१॥ सूत
उवाच ॥ प्रियः पतिमथामंत्र्य गते देवर्षिसत्तमे ॥ हर्षोत्फुल्लानना सत्या वासुदेवं तदाब्रवीत् ॥२॥ सत्योवाच ॥
धन्यास्मि कृतकृत्यास्मि सफलं जीवितं च मे ॥ मज्जन्मनः कारणौ तौ धन्यौ तौ पितरौ मम ॥३॥ यो मां त्रै
लोक्यसुभगां जनयामासतुर्ध्रुवं ॥ षोडशस्त्रीसहस्राणां वल्लभाहं यतस्तव ॥४॥ यस्मान्मयादिपुरु
षः कल्पवृक्षसमन्वितः ॥ यथोक्तविधिना सम्यङ् नारदाय समर्पितः ॥५॥ यद्वार्त्तामपि जानंति भू
मिसंस्थान जंतवः ॥ सोऽयं कल्पद्रुमो गेहे मम तिष्ठति सांप्रतं ॥६॥ त्रैलोक्याधिपतेश्चाहं श्रीप
तेरतिवल्लभा ॥ अतोहं प्रष्टुमिच्छामि किंचित्त्वां मधुसूदन ॥७॥ यदि त्वं मत्प्रियकरः कथयस्वात्र वि प३
स्तरं ॥ श्रुत्वा तत्त्व पुनश्चाहं करोमि हितमात्मनः ॥८॥ यथा कल्पं त्वया देव वियुक्ता स्यां न कर्हिचित् ॥
सूत उवाच ॥ इति प्रियावचः श्रुत्वा स्मेरास्यः सगदाग्रजः ॥९॥ सत्याकरे करं कृत्वाऽगमत्कल्प

१

तरोस्तलं ॥ निषिध्यानुचरं लोकं सविलासः प्रियान्वितः ॥१०॥ प्रहस्य सत्यामामंत्र्य प्रोवाच जगतां पतिः ॥
स्त्रीतिपरितोषार्थं लसत्पुलकितांगकः ॥११॥ श्रीकृष्ण उवाच ॥ न मे त्वत्तः प्रियतमा काचिदस्ति
नितंबिनी ॥ षोडशस्त्रीसहस्राणां प्रिये प्राणसमा ह्यसि ॥१२॥ त्वदर्थे देवराजेन विरोधो देव
तैः सह ॥ त्वया तत्प्रार्थितं कांते शृणु तच्च महद्भवेत् ॥१३॥ अदेयं मम देयं वा कार्यं वाऽकार्यमेव
यत् ॥ तेत्कौमिकृपंश्रभ्नकथयामि न तु प्रिये ॥१४॥ पृच्छस्व सर्वं कथये यत्ते मनसि वर्तते ॥ स
त्यभामोवाच ॥ दानं व्रतं तपो वापि किं तु पूर्वं मया कृतं ॥ येनाहं मर्त्यजा मर्त्यभावातीताऽभवं किल ॥
तवांगार्द्धहरा नित्यं गरुडोपरिगामिनी ॥१६॥ इंद्रादिदेवतावासमगमं च त्वया सह ॥ अतस्त्वां
पृष्टुमिच्छामि कृतं किं नु मया शुभं ॥१७॥ भवांतरे च किंशीला काहं कस्य कन्यका ॥ श्रीकृष्ण
उवाच ॥ शृणुष्वैकमना कांते यथा त्वं पूर्वजन्मनि ॥ पुण्यव्रतं कृतवती तत्सर्वं कथयामि ते ॥१८॥
आसीत्कृतयुगस्यांते मायापुर्यां द्विजोत्तमः ॥ आत्रेयो देवशर्मेति वेदवेदांगपारगः ॥१९॥ आ

Indira Gandhi National
Centre for the Arts

कार्त्ति० आतिथ्याग्निशुश्रूषासौरव्रतपरायणः ॥ सूर्यमाराधयन्नित्यं साक्षात्सूर्य इवापरः २०
२ तस्यातिवयसस्त्वासीन्नाम्ना गुणवती शुभा ॥ अपुत्रः सः स्वशिष्याय चंद्रनाम्ने ददौ सुतां ॥२१॥
तमेव पुत्रवन्मेने स च तं पुत्रवद्वशी ॥ तौ कदाचिद्वनं यातौ कुशेध्माहरणार्थिनौ ॥२२॥ हि
माद्रिपादपवने चेरतुस्तावितस्ततः ॥ तावत्तौ राक्षसं घोरमायांतं समपश्यतः ॥२३॥ भ
यविह्वलसर्वांगौ समर्थौ पलायितुं ॥ निहतौ तरसा तेन कृतांतसमरूपिणा ॥२४॥ तौ तत्क्षे
त्रप्रभावेण धर्मशीलतया पुनः ॥ वैकुंठभवनं यातौ मद्गणैर्मत्समीपकौ ॥२५॥ यावज्जी
वं तु यत्ताभ्यां सूर्यपूजादिकं कृतं ॥ तेनाहं कर्मणा ताभ्यां सुप्रीतोऽभवं किल ॥२६॥ सौरा
श्च शैवा गाणेशा वैष्णवाः शक्तिपूजकाः ॥ मामेव प्राप्नुवंतीह वर्षापः सागरं यथा ॥२७॥ एकोऽहं पंचधा
जातः क्रीडया नामभिः किल ॥ देवदत्तो यथा कश्चित्पुत्राद्याह्वाननामभिः ॥२८॥ ततस्तौ मद्भवना २

ग्निवासिनौ विमानयानौ रविवर्च्चसावुभौ ॥ मत्तुल्यरूपौ मम संनिधानगौ दिव्यांगनाचंदनभोगभोगिनौ ॥२९॥
इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादे प्रथमोऽध्यायः ॥ श्रीकृष्ण उवाच ॥ ततो गुण
वती श्रुत्वा राक्षसान्निहतावुभौ ॥ पितृभर्तृजदुःखार्त्ता करुणं पर्यदेवयत् ॥१॥ गुणवत्युवाच ॥ हा ना
थ हा पितस्त्यक्त्वा गच्छतः क्व मया विना ॥ बालाहं किं करोम्यद्य अनाथा भवतो विना ॥२॥ को मां पाल
६६॥ यिता गेहे भोजनाच्छादनादिभिः ॥ अकिंचित्कुशलां स्नेहाद्बालयत्यति दुःखिता ॥३॥ हतभाग्या हतस्
त्वाहं हताशा हतजीविता ॥ शरणं कं प्रयाम्यद्य यो मे दुःखं प्रमार्जयेत् ॥४॥ क्व यास्यामि क्व गच्छामि तिष्ठामि
किं करोमि यथा घृणां ॥ विधात्रा हा हतास्म्यद्य अनाथा वनबालिशा ॥५॥ श्रीकृष्ण उवाच ॥ एवं बहुवि
लप्याथ कुररीव सातुरा ॥ पपात भूमौ विकला रंभा वातहता यथा ॥६॥ चिरादाश्वास्य सा भूयो विल
प्य करुणं बहु ॥ निमग्ना दुःखजालौघे शोकार्त्ता समवर्त्तत ॥७॥ सा गृहोपस्कराण्याशु विक्रीय वसु

Indira Gandhi National
Centre for the Arts

२

पकर्म कृतं ॥ तपोऽश्व क्रे यथाशक्ति पारलौकीततः क्रियां ॥ ८ ॥ तस्मिन्नेव पुरे वासं चक्रे सा स्मर जीवि
नी ॥ विष्णुभक्तिपराशान्ता सत्यशौचादितत्परा ॥ ९ ॥ व्रतद्वयं त्वया सम्यग्गज मम रणाकृतं ॥ एका
दशी व्रतं सम्यक् सेवनं कार्त्तिकस्य च ॥ १० ॥ एतद्व्रतद्वयं कान्ते मम मातीव प्रीयं कुरु ॥ भक्तिमुक्तिक
रं पुण्यं पुत्रसंपत्तिदायकं ॥ ११ ॥ कार्त्तिके मासि ये नित्यं तुलासंस्थे दिवाकरे ॥ प्रातः स्नास्यन्ति
ते मुक्ता महापातकिनोपि च ॥ १२ ॥ स्नानं जागरणं दीपं तुलसीवनपालनं ॥ कार्त्तिके ये प्रकुर्व
न्ति ते नरा विष्णुमूर्त्तयः ॥ १३ ॥ संमार्जनं गृहे विष्णोः स्वस्तिकादि निवेदनं ॥ विष्णोः पूजां च ये कुर्यु
र्जीवन्मुक्तास्त्वते नराः ॥ १४ ॥ इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्वते ॥ देवानामपि ते वंद्याः किं
ये राजन्मपि कृतं ॥ १५ ॥ इत्थं दिनेत्रयमपि गुणां सम्यक् प्रत्यब्दं प्रतनी स्वभूतं ॥ इत्थं विष्णोपरि
करे शान्त्या तत्परमानसा ॥ १६ ॥ कदाचिज्जरसा साथ कृशांगी ज्वरपीडिता ॥ स्नातुं गंगां गता

वर्त्ती २

३

कान्ते कथं चिद्धनकैस्तदा ॥ यावज्जलान्तरगता स्मर्त्तकं पतीशीतपीडिता ॥ तावत्सा विकुलापश्यत्
विमानं यातमंबरात् ॥ १८ ॥ शंखचक्रगदापद्महस्तैरासन्नमंबरात् ॥ विष्णुरूपधरैः सम्यग्विमा
नं तत्तद्ध्वजांकितैः ॥ १९ ॥ आरोहयत्त विमानं तमप्सरोगणसेवितं ॥ चामरैर्वीज्यमानां तां वैकुंठम
नयन्गणाः ॥ २० ॥ अथ सा तद्विमानस्था ज्वलदग्निशिखोपमा ॥ कार्त्तिकव्रतपुण्येन मत्सान्नि
ध्यगता भवत् ॥ २१ ॥ अथ ब्रह्मादिदेवानां यथा प्रार्थन याभुवं ॥ आगतो हं गणाः सर्वे यातास्ते
पि मया सह ॥ २२ ॥ एते हि यात्वा सर्वे मद्गणा एव भामिनि ॥ पिता ते देवशर्मासी सत्राजिदभि
धो ह्ययं ॥ २३ ॥ यश्चंद्रशर्मासी क्रूर स्त्वं सा गुणवती शुभा ॥ कार्त्तिकव्रतपुण्येन बहु फुमप्रीति
दायिनी ॥ २४ ॥ मम द्वारे त्वया पूर्वं तुलशी वाटिका कृता ॥ तस्मात्कल्पतरुस्तवांगणगता शु
भे ॥ २५ ॥ कार्त्तिके दीपदानं च त्वया तु सुकृतं पुरा ॥ त्वद्गेहगेहसंस्थेयं तस्माल्लक्ष्मीः स्थिरा भवत् ॥ २६ ॥
पद्मव्रतात्किं पुण्यं विश्वे भर्तृ कृपिरो निवेदयं भवती तस्मान्मम भार्या त्वमागता ॥ २७ ॥ आजन्म

Indira Gandhi National
Centre for the Arts

४ मरणात्पूर्वं कार्त्तिकेय व्रतं कृतं ॥ कदाचिदपि तेन त्वं मद्वियोगं न यास्यसि ॥२८॥ एवं ये कार्त्तिके
मासि नरा व्रतपरायणाः ॥ मत्सान्निध्यं गतास्तेपि प्रीतिदास्त्वं यथा मम ॥२९॥ यज्ञदानव्रततपःका
रिणो मानवा खलु ॥ कार्त्तिकव्रतपुण्यस्य नाप्नुवंति कलामपि ॥३०॥ इत्थं निशाम्य भुवनाधि
पतेस्तदानीं प्राग्जन्मपुण्यविभवैर्भवजातहर्षा ॥ विष्णुं विभुं त्रिभुवनैकनिदानभूतं कृष्णं प्रणा
म्य निजगाद च सत्यभामा ॥३१॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासं
वादे पूर्वजन्मवृत्तांतकथनो नाम द्वितीयोध्यायः ॥२॥ सत्यभामोवाच ॥ सर्वेपि कालावयवास्त्व
वकालस्वरूपिणः ॥ समानास्तत्थं कथं नाथ मासानां कार्त्तिको वरः ॥१॥ एकादशी व्रता
नां च मासानां कार्त्तिकः प्रियः ॥ कथं ते देवदेवेश कारणं किंच कथ्यतां ॥२॥ श्रीकृष्ण उवा
च ॥ साधु पृष्टं त्वया कांते तच्छृणुष्वैकमानसा ॥ पृथोर्वैण्यस्य संवादे देवर्षेर्नारदस्य च ॥३॥ ४

एवमेव पुरा पृष्टो नारदः पृथुना प्रिये ॥ उवाच कार्त्तिकाधिक्यकारणं सर्वविन्मुनिः ॥४॥ शंखो नामाभव
त्पूर्वमसुरः सागरात्मजः ॥ त्रिलोकीमथने शक्तो महाबलपराक्रमः ॥५॥ जित्वा देवान्निराकृत्य स्व
र्लोकात्स महासुरः ॥ इंद्रादिलोकपालानामधिकारांस्तदाहरत् ॥६॥ तद्भयादथ ते देवाः सुवर्णा
द्रिगुहां गताः ॥ न्यवसन् बहुवर्षाणि सावधानाः सवासवाः ॥७॥ सुवर्णाद्रिगुहादुर्गसंस्थितास्त्रि
दशाधिपाः ॥ तद्वशानो बभूवुस्ते तदा दैत्यो विचारयत् ॥८॥ हृताधिकारास्त्रिदशा मया यद्यपि निर्जि
ताः ॥ लक्ष्यंते बलपुष्टास्ते करणीयं ममात्र किं ॥९॥ अद्य ज्ञातं मया देवा वेदमंत्रबलान्विताः ॥ तान्
हरिष्ये ततः सर्वे बलहीना भवंति हि ॥१०॥ इति मत्वा ततो दैत्यो विष्णुमालक्ष्य निद्रितं ॥ सत्यलोका
ज्जहाराशु वेदान्ब्रह्मस्वयंभुवः ॥११॥ नीतास्तेन यदा वेदास्तद्भयात्तेनिराक्रमन् ॥ तोयानि वि
विशुर्यस्मात्र बीजसमन्विताः ॥१२॥ तान्मार्गमाणः शंखोपि समुद्रांतर्गतोभ्रमत् ॥ न ददर्श
ततो दैत्यः क्वचिदेकांतसंस्थितान् ॥१३॥ अथ ब्रह्मा सुरैः सार्कं वैकुंठशरणमाययात् ॥ पूजोपक

Indira Gandhi National Centre for the Arts

५ रणान्नगरं प्रवैकुंठभवनं गतः ॥१४॥ तत्र तस्य प्रबोधाय गीतवाद्यादिकाः क्रियाः ॥ चक्रुर्देवास्तथा
गंधधूपदीपान्मुहुर्मुहुः ॥१५॥ अथ प्रबुद्धो भगवान्तद्भक्तिपरितोषितः ॥ उपचारैः षोडशभिः
संपूज्य त्रिदशास्तथा ॥१६॥ ददर्श पतितान्भूमौ तानुवाचाथ माधवः ॥ विष्णुरुवाच ॥ वरदोहं
सुरगणा गीतवादित्रमंगलैः ॥ मनोभिलषितान्कामान्सर्वानेव ददामि वः ॥१८॥ इषस्य शुक्ले
कादश्यां यावद्बोधिनी भवेत् ॥ निशायां ये जागरणं गीतवाद्यादिमंगलान् ॥१९॥ कुर्वंति नि
त्यं मनुष्यास्ते भवद्भिश्च यथा कृतं ॥ ते मत्प्रियकरा नित्यं मत्सान्निध्यं व्रजंति हि ॥२०॥ पाद्यार्घ्याचमनीया
दि भवद्भिर्यथा कृतं ॥ तदद्भुतगुणं पश्चाज्जातं वः सुखकारणं ॥२१॥ तेन नीताः कृते वेदास्तिष्ठं
त्युदधिसंस्थिताः ॥ तानानयाम्यहं देवा हत्वा सागरनंदनं ॥२२॥ अद्य प्रभृति वेदाश्च मंत्रबी
जसमन्विताः ॥ प्रत्यब्दं कार्तिके मासि विश्राम्यंतु त्वप्सु सर्वदा ॥२३॥ मत्स्यरूपोथाहमपि भवामि ५

जलमध्यगः ॥ भवंतोपि मया सार्द्धं समायांतु मुनीश्वराः ॥२४॥ कालेस्मिन् ये प्रकुर्वंति प्रातःस्नानं द्विजो
त्तमाः ॥ ते सर्वयज्ञावभृथैः सुस्नाताः स्युः न संशयः ॥२५॥ ये कार्तिकव्रतं सम्यक् कुर्वंति मनुजाः सदा ॥
तेदेहांते त्वया शक्र प्राप्याः मद्भवनं तदा ॥२६॥ विघ्नेभ्यो रक्षणं तेषां तथा कार्यं तदा त्वया ॥ देया त्वया
च वरुण पुत्रपौत्रादिसंततिः ॥२७॥ धनवृद्धिर्धनाध्यक्ष त्वया कार्या ममाज्ञया ॥ मम रूपधरः साक्षा
ज्जीवन्मुक्तो भवेत्पुनः ॥२८॥ आजन्ममरणाद्येन कृतमेतद्व्रतोत्तमं ॥ यथोक्तविधिना सम्य
क् स मान्यो भवतामपि ॥२९॥ एकादश्यां यतश्चाहं भवद्भिः प्रतिबोधितः ॥ अतश्चैषा तिथिर्मान्या सा
तीव प्रीतिदा मम ॥३०॥ व्रतद्वयं सम्यगिदं नरैः कृतं सर्वान्निहन्त्येनसथान्यदस्ति ॥ दानानि तीर्थानि त
पांसि यज्ञाः स्वर्लोकदान्येव सदा सुरोत्तमाः ॥३१॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये श्रीकृष्ण
सत्यभामासंवादे देवागमनं नाम द्वितीयोध्यायः ॥३॥ नारद उवाच ॥ इत्युक्त्वा भगवान्विष्णुः



Indira Gandhi National
Centre for the Arts

म

६ शाकरीतुल्यरूपधृक॥स्वासपातांजलौविंध्यवासिनःकश्यपस्यस॥१॥तंतंकमंडलौक्षिप्तं कूपयाश्रि
तवान्मुनिः॥तावत्सनमभोतत्र तनंःकूपेन्यवेशयत॥२॥तत्रापिनममौतावत्कासारंप्रापयत्ससता॥
एवंसमसागरेक्षिप्तस्तत्र सोप्यभ्यवर्द्धत॥३॥ततोवधीत्सतंशंखंविष्णुर्मत्स्यस्वरूपधृक॥अथतंस्वे
करेधृत्वावदरीवनमागमत॥४॥तत्राकूपस्टषीन्सर्वान्ऋद्दमाराापयत्प्रभुः॥श्रीविष्णुरु
वाच॥जलांतरविसीर्णास्तुपूर्ववेदान्समार्गय॥५॥आनयध्वंचत्वरिताःसरहस्याञ्जलांतरात॥
तावत्प्रयागेतिष्ठामिदेवतागणसंयुतः॥६॥ततस्तेसर्वमुनिभिस्तपोबलसमन्वितैः॥७धृतिताःसडंगास्ते
वेदायज्ञसमन्विताः॥७॥येषुयावन्मितंयेनलब्धंतावद्धृतस्यतत॥सस्तएवस्टषिर्जातस्तदाप्रभृति
पार्थिव॥८॥अथसर्वेपिसंगम्यात्रयागंमुनयोपयुः॥विष्णवेसविधात्रे[illegible]तेलब्धावेदान्यवेदयन॥९॥
लब्ध्वावेदान्सयज्ञांस्तुब्रह्माहर्षसमन्वितः॥अथजह्वाजिमेधेनदेवर्षिगणसंवृतः॥१०॥यज्ञांतेदेवगं ६
दा

८।३
धर्वाःसिद्धपन्नगगुह्यकाः॥निपत्यदंडवद्भूमौविरंचिंचक्रुरंजसा॥११॥देवाऊचुः॥त्वंदेवजगन्नाथविश्व
स्थितिःसृष्टिकृत्प्रभो॥हर्षकालोयमस्माकंतस्मात्त्वंवरदोभव॥१२॥स्थानेस्मिन्द्रुहिणोवेदान्नष्टा
न्प्राप्यस्तवयं॥यज्ञांतेभागांश्चयंप्राप्तास्त्वत्प्रसादात्समापते॥१३॥स्थानमेतददतिश्रेष्ठंपापक्षयापुण्य
वर्द्धनं॥भुक्तिमुक्तिप्रदंपापंत्वत्प्रसादाद्भवतःसदा॥१४॥कालोप्ययंमहापुण्योब्रह्मघ्नादिविशुद्धिकृत॥
दृष्टोक्षयकरस्त्वास्तुवरमेनंददस्वनः॥१५॥विष्णुरुवाच॥ममाप्येतन्मतंदेवापद्भवद्भिरुदाहृतं॥तत्तथा
स्त्वेमंवत्वेतद्ब्रह्मक्षेत्रमितिप्रथा॥१६॥सूर्यवंशोद्भवोराजागंगामत्रानयिष्यति॥सासूर्यकन्ययाचा
त्रकालिंद्यायोगमेष्यति॥१७॥एवंचसर्वेद्रव्याद्यानिवसध्वंमयासह॥तीर्थराजेतिविख्यातंतीर्थमेत
द्भविष्यति॥१८॥दानंतपोव्रतंहोमोजपःपूजादिकाक्रियाः॥अनंतफलदास्संतुमत्सान्निध्यकरा
सदा॥१९॥ब्रह्महत्यादिपापानिबहुजन्मकृतान्यपि॥दर्शनादेवतीर्थस्यविनाशयांतितत्क्षणात॥२०॥
देहत्यागंतथाधीराःकुर्वंतिममसन्निधौ॥मत्तनुंप्रविशंत्येवनपुनर्जन्मिनोनराः॥२१॥पितृन्नुद्दि

८ श्यपे श्राद्धं कुर्वंस्तत्र समागताः ॥ तेषां पितृगणाः सर्वे यांति ते स्वर्गलोकतां ॥ कालो ह्येष महापुण्यः
फलदो ऽस्य महामुने ॥ सूर्ये मकरगे प्रातः स्नायिनां पापनाशनः ॥२३॥ मकरस्थे रवौ माघे प्रातः
स्नानं कुर्वतां ॥ दर्शनादेव पापानि यांति सूर्याद्यथा तमः ॥ सलोकत्वं सरूपत्वं सामीप्यत्वं क्रमात् ते ॥
४ह न्तृणां दद्यां सायुज्यं स्नानात् माघे मकरगे रवौ ॥२५॥ यूयं मुनीश्वराः सर्वे शृणुध्वं वचनं मम ॥ बदरीव
नमध्येऽहं सदा तिष्ठामि सर्वगः ॥२६॥ अन्यत्र दशभिर्मासैस्तपसा वाप्यते फलं ॥ तत्रैव दिवसैकेन
माघे प्राप्यते फलं ॥२७॥ स्थानस्य दर्शनं तस्य कुर्वंति हि नरोत्तमाः ॥ जीवन्मुक्तास्तथा तेषु पापं नैवो
पतिष्ठति ॥२८॥ सूत उवाच ॥ एवं देवान्देवदेवस्तूक्त्वा तत्रैवांतर्धानमागात्स वेधाः ॥ देवास्तत्र
स्वीयाः केऽस्तत्र तिष्ठन्नंतर्धानं प्रापुरिंद्रादयस्ते ॥२९॥ इमां कथां पठन्मर्त्यः पापान्तरोत्तमोपि श्रावये
द्वापि विशुद्धचित्तैः ॥ स तीर्थराजबदरीवनं यद्गत्वा फलं तत्समवाप्नुयाद्धि ॥३०॥ इति श्रीप
द्मपुराणे कार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादे शंखासुरवधो वेदोद्धरणं नाम चतुर्थो ८

ध्यायः ॥४॥ पृथुरुवाच ॥ महाफलं त्वया प्रोक्तं मुने कार्तिकमाघयोः ॥ ब्रूहि स्नानफलं सम्यक् नियमानपि
नारद ॥१॥ उद्यापनविधिं ब्रूहि यथावत्प्रणतस्य मे ॥ नारद उवाच ॥ त्वं विष्णोरंशजातोसि न ज्ञातं विद्य
ते तव ॥२॥ तथापि वदतः सम्यक् माहात्म्यं शृणु वै नृप ॥ आश्विनस्य तु मासस्य या शुक्ला एकादशी भ
वेत् ॥३॥ कार्तिकस्य व्रतानीह तस्यां कुर्यादतंद्रितः ॥ रात्र्यां तुर्यांशशेषायां मुदा तिष्ठेत्सदा व्रती ॥४॥ नैर्ऋता
शां व्रजेद्ग्रामाद्बहिर्मोदकभाजनः ॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्रं उदङ्मुखः ॥५॥ अंतर्धाय तृणैर्भू
मिं शिरः प्रावृत्य वाससा ॥ वक्त्रं नियम्य यत्नेन ष्ठीवनाश्वासवर्जितः ॥६॥ कुर्यान्मूत्रपुरीषे च रात्रौ च
दक्षिणामुखः ॥ गृहीत्वा सिंधुवोत्थाय गृहीत्वा तु विमृत्तिकां ॥७॥ गंधलेपक्षयकरं शौचं कुर्याद्यतंद्रि
तः ॥ एका लिंगे करे तिस्रः उभयोर्मृद्द्वयं स्मृतं ॥८॥ द्विसप्त वा पादयोः पंच गृहीणां शौचमुच्यते ॥ एत
द्विगुणं प्रोक्तं ब्रह्मचारिवनस्थयोः ॥९॥ यतेश्चतुर्गुणं रात्रौ तदर्धं शौचमाचरेत् ॥ तदर्धं रोगमार्गे

न.४

Indira Gandhi National
Centre for the Arts

८ स्येष स्त्री मूगान दर्द्दकं ॥१०॥ शौचकर्मविहीनस्य सकला निःफलाः क्रियाः ॥ मुखशुद्धिविहीनस्य मंत्रा न फ
लदायकाः ॥११॥ दंतजिह्वाविशुद्धिश्च ततः कुर्यात्प्रयत्नतः ॥ आयुर्बलं यशो वर्चः प्रजापशुवसूनि
च ॥१२॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ इतिमंत्रं समुच्चार्य द्वादशांगुलयाग्रहीत् ॥१३॥
समिधा क्षीरवृक्षस्य क्षयाहोपोषणौ विना ॥ प्रतिपद्दर्शषष्ठीषु नवम्येकादशी रवौ ॥१४॥ चंद्रसू
र्योपरागे च न कुर्याद्दंतधावनं ॥ कंटकीवृक्षकार्पासनिर्गुंडीब्रह्मवृक्षकान् ॥१५॥ वटैरंडविग
धाद्यान् वर्जयेद्दंतधावने ॥ ततो विशुद्धो विष्णोश्च गृहे गच्छेत्प्रसन्नधीः ॥ गंधपुष्पार्घ्यतां
बूलं गृहीत्वा भक्तितत्परः ॥ तत्र देवस्य पाद्यादीनुपचारान्पृथक्पृथक् ॥ कृत्वा स्तुत्वा
पुनर्नत्वा कुर्याद्गीतादिमंगलं ॥ तालवेणुमृदंगादि च नियुक्तं च कीर्त्तनं ॥ धूपैर्दीपैः सतांबूलै
र्गायकानपि चार्चयेत् ॥ देवालये गानपरा यातास्ते विष्णुमूर्त्तयः ॥ तपांसि यज्ञदानानि कृतानि भुजंग ८

९

पुरोः ॥ तुष्टिदानि कलौ यस्माद्गत्या गानं विशिष्यते ॥ कल्येव वससि देवेश यथा पृष्टस्तु पार्थिव विष्णुरेवं नर
प्राह मद्भक्तिपरितोषितः ॥ नाहं वसामि वैकुंठे योगिनां हृदये न च ॥ मद्भक्तास्तत्र गायंते तत्र तिष्ठामि नार
द ॥ तेषां पूजादिकं धार्घं धूपाद्यैः क्रियते नरैः ॥ तेन प्रीतिं परां यामि न तथा मत्प्रपूजनात् ॥ मत्पुराणकथा
श्रुत्वा मद्भक्तानां च गायनं निंदंति ये नरा मूढास्ते मे द्वेष्या भवंति हि ॥ शिरीषोन्मत्तगिरिजा मल्लिका न ८
शाल्मलीभवैः ॥ अर्के जे कर्णिकारैश्च विष्णुर्नार्च्यस्तथाक्षतैः ॥ जपाकुंदशिरीषैश्च यूथिकामालती
भवैः ॥ केतकीभवपुष्पैश्च नैवार्च्यः शंकरः सदा ॥ गणेशं तुलसीपत्रैर्दुर्गां नैव तु दूर्वया ॥ मुनिपुष्पै
स्तथा सूर्यं लक्ष्मीकामो न चार्चयेत् ॥ एभ्योन्यानि तु पुष्पाणि पूजायां सर्वदैवतुः ॥ एवं पूजाविधिं
कृत्वा देवदेवं क्षमापयेत् ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तद

४
स्तमे ॥ ततः प्रदक्षिणं कृत्वा हृदयस्त्रलिपत्य च ॥ पुनः क्षमापयेद्देवं गायनाद्यं समापयेत् ॥ नरेंद्र उ
वाच ॥ विष्णोः प्रावस्यापि हि पूजनं ये कुर्वंति मम्पाद्य द्विकीर्तनं च ॥ विधूतपापाः सह पूर्वजैश्च प्रयां
ति विष्णोर्भवनं मनुष्याः ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये पूजाजागरणविधिः पंचमोऽध्या
यः ॥ ५ ॥ राजेंद्र उवाच ॥ नाडीद्वया विशिष्टायां रात्रौ गत्वा जलाशयं ॥ तिलदर्भाक्षतैः पुष्पगंधाद्यैः
सहितः शुचिः ॥ मानुषे देवखाते च नद्यां प्रस्रवसंगमे ॥ क्रमाद्दशगुणं स्नानं तीर्थे तद्द्विगुणं स्मृतं ॥
विष्णुं स्मृत्वा ततः कृत्वा संकल्पं सावनस्य तु ॥ तीर्थादिदेवताभ्यश्च क्रमादर्घादिदापयेत् ॥ नमः
कमलनाभाय नमस्ते जलशायिने ॥ नमस्तेस्तु हृषीकेश गृहाणार्घ्यं नमोस्तु ते ॥ वैकुंठे च प्र
यागे च तथा बदरीकाश्रमे ॥ यतो विष्णुर्विचक्रमस्त्रेधामनि दधे पदं ॥ अतो देवा मामवंतु त्रे
धामनिदध्ये पदं ॥ तैरेव सहितैः सर्वैर्मुनिदेवमरवान्वितैः ॥ कार्तिकेहं करिष्यामि प्रातः स्नानं ५

जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदर मया सह ॥ ध्यात्वाहं त्वां च देवेश जलेस्मिन्स्नातुमुद्यतः ॥ तव प्र
सादात्पापं मे दामोदर विनश्यतु ॥ नित्ये नैमित्तिके कृत्स्ने कार्त्तिके पापनाशने ॥ गृहाणार्घ्यं मया दत्तं द
नुजेंद्र निषूदन ॥ स्मृत्वा भागीरथीं विष्णुं शिवं सूर्यं जले विशेत् ॥ नाभिमात्रे जले तिष्ठेद्व्रती स्नाया
द्यथाविधिः ॥ तिलामलकचूर्णेन गृही स्नानं समाचरेत् ॥ विधवानां यतीनां च तुलसीमूलमृत्तिका ॥
सप्तमी दर्शनवमी द्वितीया दशमीषु च ॥ त्रयोदश्यां च न स्नायाद्धात्रीफलतिलैः सह ॥ आदौ कुर्यान्म
लस्नानं मंत्रस्नानं ततः परं ॥ स्त्रीशूद्राणां न वेदोक्तैर्मंत्रैस्तेषां पुराणजैः ॥ त्रिधा भूद्देवकार्यार्थं
यः पुरासत्किमाविनः ॥ स विष्णुः सर्वपापघ्नः पुनातु कृपयात्र मां ॥ विष्णोराज्ञामनुप्राप्य कार्त्तिकव्रत
कारणात् ॥ रक्षंतु देवताः सर्वे मां पुनंतु सवासवाः ॥ वेदमंत्राः सबीजाश्च सरहस्या मखान्वि

Indira Gandhi National
Centre for the Arts

१० ता॥कश्यपाद्याश्चमुनयोमांपुनंतुसदैवहि॥पतिव्रतास्त्वदित्याद्याःपक्षाःसिद्धाःसपन्नगाः॥ओ
षध्यःपर्वताश्चापिमांपुनंतुत्रिलोकजाः॥एभिर्मंत्रैश्चव्रतीमंत्रैर्हस्तन्यस्तपवित्रकः॥देवर्षिमानवा
न्पितॄंश्चतर्पयेच्चयथाविधिः॥यावंतिकार्त्तिकेमासिवर्त्तंतेपितृतर्पणे॥तिलाक्षतस्संख्ययाब्दा
निपितरःस्वर्गवासिनः॥ततोजलाद्विनिःक्रम्यशुचिवस्त्रावृतोव्रती॥प्रातःकालोदितंकर्म
समाप्याथहरिंपुनः॥तीर्थानिदेवान्संस्मृत्यपुनरर्घ्यंप्रदापयेत्॥गंधपुष्पफलैर्युक्तंभक्त्या
तत्परमानसः॥व्रतीनांकार्त्तिकेमासिस्नानंतस्यविधिर्मम॥गृहाणार्घ्यंमयादत्तंराधयासहितोहरे
हरे॥ततश्चब्राह्मणान्भक्त्यापूजयेद्देवमग्रगान्॥गंधपुष्पैश्चतांबूलैःप्रणमेच्चपुनःपुनः॥
तीर्थानिदक्षिणेपादेवेदास्तेमुखमाश्रिता॥सर्वांगेष्वस्थितादेवाःपूजितास्तेसदर्चने॥अ
१०

व्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि॥नावमान्यानोविरोध्याःकदाचिच्छुभमिच्छता॥त तो
हरिप्रियांदेवींतुलसीमर्चयेद्व्रती॥प्रदक्षिणानमस्कारान्कुर्यादेकाग्रमानसः॥देवैस्त्वंनिर्मि
तापूर्वमर्चितासिमुनीश्वरैः॥नमोनमस्तेतुलसीपापहारिहरिप्रिये॥ततोविष्णुकथांश्रुत्वापौ
राणींस्थिरमानसः॥ब्राह्मणंतुमुनींविप्रपूजयेद्भक्तिमान्व्रती॥एवंसर्वंविधिंसम्यक्सर्वोक्तं
भक्तिमान्नरः॥करोतियःसलभतेनारायणसलोकतां॥रोगापहंपापवि नाशकृत्परंसद्बुद्धि
प्रदंपुत्रधनादिसाधनं॥मुक्तेर्निदानंनहिकार्त्तिकव्रताद्विष्णुप्रियादन्यदिहास्तिभूतले॥इतिश्रीका
र्त्तिकमाहात्म्येषष्ठोऽध्यायः॥नारदउवाच॥कार्त्तिकव्रतिनांपुंसांनियमायेप्रकीर्त्तिताः॥तांश्शृणुष्व
महाबाहोकथ्यमानान्समासतः॥अन्नदानंगवांग्रासंवैष्णवैःसहसंकथां॥बोधनंपरदीपस्यध
र्ममार्गंमनीषिणः॥परान्नंपरशय्यांचपरवादंपरांगनां॥सर्वातुवर्जयेत्स्त्रागोविशेषेणकार्त्तिके॥तैला

Indira Gandhi National
Centre for the Arts

भ्यंगं तथा शय्यां परान्नं कांस्यभोजनं ॥ कार्त्तिं वर्जयेद्यस्तु परिपूर्णव्रती भवेत् ॥ सर्वामिषाणि मांसं च क्षौ
द्रं सौवीरकं तथा ॥ राजमाषादिकं चापि नैवाद्यात्कार्त्तिव्रती ॥ देवद्वेद्द्विजानां च गुरुगोव्रतिनां
तथा ॥ स्त्रीराजमहतां निंदां वर्जयेत्कार्त्तिकव्रती ॥ द्विदलं तिलतैलं च तथान्नं शल्यदूषितं ॥ भाव
दुष्टं शब्ददुष्टं वर्जयेत्कार्त्तिकव्रती ॥ मृत्तिका चूर्णमामिषं फले जंबीरमामिषं ॥ धान्ये मसूरि
काप्रोक्ता ह्यन्नं पर्युषितं ॥ तथा ॥ अजागोमहिषीभूतादन्यदुग्धादि चामिषं ॥ द्विजविक्री
ताः रसाः सर्वे लवणं भूमिजं तथा ॥ ताम्रपात्रे स्थितं जलं पल्वलसंस्थितं ॥ आत्मार्थं पाचि
तं सर्वमामिषं तत्स्मृतं बुधैः ॥ ब्रह्मचर्यमधःसुप्ति पत्रावल्यां च भोजनं ॥ चतुर्थकाले भुंजीत कुर्या
देवं सदा व्रती ॥ नरकस्य चतुर्दश्यां तैलाभ्यंगं तु कारयेत् ॥ अन्यत्र कार्त्तिके स्नायी तैलाभ्यं
च वर्जयेत् ॥ पलांडुं लसुनं हिंगु [illegible]त्राकं गृंजनं तथा लिकामूलकं शिग्रु वर्जयेत्कार्त्ति

गवां ४ 

कव्रती ॥ अलाबुं चापि वृंताकं कूष्मांडं बृहतीफलं ॥ श्लेष्मातकं कपित्थं च वर्जयेत्कार्त्तिकव्रती ॥ र
जस्वलां त्यजेन्म्लेच्छं पतितां व्रतकैस्तथा ॥ द्विजद्विड्वेदबाह्यैश्च न वदेच्च सदा व्रती ॥ एभिर्दृष्टं च कं
कैश्च सूतिकान्नं च वर्जयेत् ॥ द्विपाचितं च दग्धान्नं नैवाद्याद्वैष्णवव्रती ॥ एतानि वर्जयेद्
नित्यं व्रती सर्वव्रतेष्वपि ॥ व्रतादिकं प्रकुर्वीत स्वशक्त्या विष्णुतुष्टये ॥ आमात् कूष्मांडबृहती शाकं
वै मूलकं तथा ॥ श्रीफलं च कलिंगं च फलं धात्रीभवं तथा ॥ नालिकेरमलाबुं च पटोलं पद्रीफलं ॥
चर्मवृंतानि कं वृष्टी शाकं तुलसीजं तथा ॥ शाकान्येतानि वर्ज्यानि क्रमात्प्रतिपदादिषु ॥ धात्रीफ
लं रवौ तद्वद्वर्जयेच्च सदा व्रती ॥ एवमेव हि माघेपि कुर्याच्च नियमान् व्रती ॥ हरिजागरणं तत्र प्रबोधो
त्सवं च कारयेत् ॥ यथोक्तकारिणं दृष्ट्वा कार्त्तिकव्रतिनं नरं ॥ यमदूताः पलायंते गजाः सिंहार्दिता यथा ॥
वरं विष्णुव्रतं ह्येतत्तन्न यज्ञशतं पाजकाः ॥ यज्ञकृत्प्राप्नुयात्स्वर्गं वैकुंठं कार्त्तिकव्रती ॥ भुक्तिमुक्ति

Indira Gandhi National
Centre for the Arts

१२ प्रयानीहया निक्षेत्राणि भूतले॥ वसंति तानि तद्देहे कार्तिकव्रतकारिणः॥ ऊं स्वयं हुतं किंचि
न्मनोवाक्कायकर्मजं॥ कार्तिकव्रतिनं दृष्ट्वा विलयं यांति तत्क्षणात्॥ कार्तिकव्रतिनां पुंसां वि
ष्णुवाक्यप्रणोदिताः॥ रक्षां कुर्वंति शक्राद्याः राजानं किंकरा यथा॥ विष्णुव्रतकरो नित्यं यत्र
तिष्ठति पूजितः॥ ग्रहभूतपिशाचाद्या नैव तिष्ठंति तत्र वै॥ कार्तिकव्रतिनश्चैव यथोक्तव्रत
कारिणः॥ न समर्थो भवेद्वक्तुं ब्रह्मापि हि चतुर्मुखः॥ विष्णुप्रियंकरं कल्मषनाशनं च सत्पु
त्रपौत्रधनधान्यसमृद्धिकारि॥ ऊर्जव्रतं स नियमं कुरुते मनुष्यः किं तस्य तीर्थपरिशी
लनसेवया च॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादे हरिजा
गरणनियमविधिः सप्तमोऽध्यायः॥ नारद उवाच॥ अथोर्जव्रतिनः सम्यगुद्यापनवि
धिं नृप॥ तच्छृणुष्व मया ख्यातं सविधिं च समासतः॥ ऊर्जशुक्लचतुर्दश्यां कुर्यादु १२

श्री

द्यापनं व्रती॥ व्रतसंपूर्णतार्थाय विष्णोः प्रीत्यर्थमेव च॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडपकं शुभं॥ सतोरणं
चतुर्द्वारं पुष्पचामरशोभितं॥ द्वारेषु द्वारपालांश्च पूजयेन्मृन्मयान्पृथक्॥ पुण्यशीलं सुशी
लं च जयं विजयमेव च॥ तुलसीमूलदेशे वै सर्वतोभद्रमुत्तमं॥ चतुर्भिर्वर्णकैः सम्यक्शो
भाढ्यं सुमनोहरं॥ तस्योपरिष्टात्कलशं पंचरत्नसमन्वितं॥ महाफलेन संयुक्तं शुभं तत्र नि
धापयेत्॥ पूजयेत्तत्र देवेशं शंखचक्रगदाधरं॥ कौशेयपीतवसनं युक्तं जलधिकन्यया॥ इं
द्रादिलोकपालानां पूजयेन्मंडले व्रती॥ द्वादश्यां प्रतिबुद्धोऽसौ त्रयोदश्यां ततः सुरैः॥ दृष्टोऽर्चितश्च
तुर्दश्यां तस्मात्पूज्यस्तिथाविह॥ तस्यामुपवसेद्भक्त्या शांतः प्रयतमानसः॥ पूजयेद्देवदेवेशं
सौवर्णं गुर्वनुज्ञया॥ उपचारैः षोडशभिर्नानाभक्ष्यसमन्वितैः॥ रात्रौ जागरणं कुर्याद्गीत

Indira Gandhi National
Centre for the Arts

१३ वाद्यादिमंगलैः॥ कुर्वीत गीतं यो मर्त्यो जागरे चक्रपाणिनः॥ जन्मांतरशतोद्भूतैर्मुक्तः स्तेन पाप
संचयैः नराणां जागरे विष्णोर्गीतवाद्यप्रकुर्वतां॥ गोसहस्रप्रदत्तानां समं फलमुदाहृतं॥ गीतनृत्या
दिकं कुर्वन् दर्शयन् कौतुकानि च॥ पुरतो वासुदेवस्य रात्रौ च हरिजागरे॥ पठन् विष्णुच
रित्राणि योरंजयति वैष्णवान्॥ मुखेन कुरुते वाद्यं स्वेच्छालापं त्वकारयेत्॥ भावैर्नर्तेन
रोपस्तु कुरुते हरिजागरं॥ दिने दिने तस्य पुण्यं तीर्थकोटिसमं स्मृतं॥ ततस्तु पौर्णमास्यां
प वै सत्नीकान् द्विजोत्तमान्॥ त्रिंशन्मितान् तथैकं वा स्ववशक्त्या वा निमंत्रयेत्॥ वरान् दत्त्वा यतो
विष्णुर्मत्स्यरूपो भवत्ततः॥ तस्मै दत्तं च जप्तं च तदक्षयफलं स्मृतं॥ मत्समन्त्रो जपेद् द्विजान्
पायसान्नादिना व्रती॥ अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं॥ प्रीत्यर्थं देवदेवेश देवानां च १३

रा।१

पृथक् पृथक्॥ दक्षिणां च यथाशक्त्या सद्घात्वा तोषयेत्तान्॥ पुनर्देवं समभ्यर्च्य देवांश्च तुलसीं तथा॥ ततो
गां कपिलां तत्र पूजयेद्विधिवद्व्रती॥ गुरुं व्रतोपदेष्टारं व्रतालंकरणादिभिः॥ सपत्नीकं समभ्य
र्च्य तांश्च विप्रान् क्षमापयेत्॥ युष्मत्प्रसादाद्देवेश प्रसन्नो मम सर्वदा॥ व्रतादस्माद्व्रतं पापं स
प्तजन्मकृतं मया॥ तत्सर्वं नाशमायातु स्थिरा मे चास्तु संततिः॥ मनोरथाश्च सफलाः संतु नि
त्यं ममार्च्चया॥ देहांते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभं॥ इति क्षमाप्य तान् विप्रान् प्रसाद्य च वि
सर्जयेत्॥ तां मर्च्चां गुरवे दद्यात् गवा पुत्रं समदा व्रती॥ ततः सुहृद्गुरुभ्यः स्वयं भुंजीत भक्तिमा
न्॥ कार्त्तिके चाथ तपसि ह्युपमेव विधिः स्मृतः॥ नारद उवाच॥ एवं यः कुरुते सम्यक् कार्त्तिक
व्रतं नरः॥ निःपापः सर्वपापेभ्यो विष्णुसान्निध्यमाप्नुयात्॥ सर्वव्रतैः सर्वतीर्थैः सर्वदानैश्च यत्फ
लं॥ तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधानतः॥ ते धन्यास्ते महाराज्यास्तेषां च सफलो भवः॥
विष्णुभक्तिपरा ये स्युः॥ कार्तिकव्रतकारिणः॥ देहस्थितानि पापानि विलयं यांति तत्क्षणात्॥ कथास्या नो

ति१

Indira Gandhi National
Centre for the Arts

१४ भवत्येषयदूर्जव्रतकृन्नरः॥ इत्यूर्जव्रतनियमं शृणोति भक्त्या यो वै तत्कथयति वैष्णवाग्रतो यः॥ तौ स
म्यक्व्रतकरणात्फलं लभेतां दृष्ट्वा लोककलुषविनाशनं लभंते॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये उद्या
पनविधिः अष्टमोध्यायः॥ पृथुरुवाच॥ त्वया पत्न्यै कथितं प्रलब्धव्रतमूर्जस्य विस्तरात्॥ तत्रया
तुलसीमूले पूजा विस्तरयोदिता॥ तेनाहं प्रष्टुमिच्छामि माहात्म्यं तुलसीभवं॥ कथमेषा प्रिया तस्य देव ति४
देवस्य शार्ङ्गिणः॥ कथमेषा समुत्पन्ना कस्मिन्स्थाने च नारद॥ एतद्ब्रूहि समासेन सर्वज्ञोसि
तो मम॥ नारद उवाच॥ शृणु राजन्नवहितो माहात्म्यं तुलसीभवं॥ सेतिहासं पुरावृत्तं तत्सर्वं कथया
मि ते॥ पुरा शक्रः शिवं द्रष्टुमगात्कैलासपर्वतं॥ सर्वैर्देवैः परिवृतः स्वप्सरोगणासेवितः॥ पावकं
तः शिवगृहं तत्र वन तत्र महदृष्टवान्॥ पुरुषं भीमकर्माणं दृष्ट्वा नृपन भीषणं॥ स एष कोऽत्र कस्त्वं
भोक्ता तो मगरीश्वरः॥ एवं पुनः पुनः पृष्टः स यदा नोचिवान्नृप॥ ततः क्रोधेन वज्रपाणिस्तं निर्भर्त्स्य वचो
ब्रवीत्॥ इन्द्र उवाच॥ रे मया पृष्टमाणोपि नो त्तरं दत्तवानसि॥ अस्तस्त्वां हन्मि वज्रेण कस्ते त्राता विदुर्मते॥ १५

इत्युदीर्य ततः कंठे वज्रेणाभ्यहनद्दृढं॥ तेनास्य कंठे नीलत्वमगाद्रुद्रो भपि भस्मतां॥ ततो रुद्रः प्रजज्वा
ल तेजसा प्रदहन्निव॥ दृष्ट्वा बृहस्पतिस्तूर्णं कृतांजलिपुटोभवत्॥ इंद्रं च दंडवद्भूमौ कृत्वा स्तो
तुं प्रचक्रमे॥ बृहस्पतिरुवाच॥ नमो देवाधिदेवाय त्र्यंबकाय कपर्दिने॥ त्रिपुरघ्नाय रुद्राय
नमोंधकनिषूदने॥ विरूपायातिरूपाय बहुरूपाय शंभवे॥ यज्ञविध्वंसकर्त्रे च यज्ञानां वरदा
यिने॥ कालांतकाय कालाय कालभोगधराय च॥ नमो ब्रह्मशिरोहर्त्रे ब्रह्मण्याय नमो नमः॥ नार
द उवाच॥ एवं स्तुतस्तदा शंभुर्दिवणोन जगाद तं॥ सहरं नयनज्वालां त्रिलोकीदग्धुं नक्षमां॥
ईश्वर उवाच॥ वरं वरय भो ब्रह्मन् प्रीतः स्तुत्यानया तव॥ इंद्रस्य जीवदानेन जीवेति त्वं प्रथांग्र
जः॥ बृहस्पतिरुवाच॥ यदि तुष्टोसि हे देव त्वं पाहींद्र शरणागतं॥ अग्निरेष शमं यातु भालनेत्रसमु
द्भवः॥ ईश्वर उवाच॥ पुनः प्रवेशमायाति भालनेत्रे कथं शिखी॥ एनं त्यजाम्यहं दूरे यथेंद्रं नैव
बाधते॥ इत्युक्त्वा तं करधृत्वा प्राक्षिपल्लवणांभसि॥ सोपि तत्सिंधुगंगायाः सागरस्य च सं

Indira Gandhi National
Centre for the Arts

१५ गर्भे ॥ सर्वतस्तु बालरूपस्त्वमगान्मत्रकरोदह ॥ रुदतस्तस्य शब्देन चकंपे धरणी मुहुः ॥ स्वर्गश्च सत्यलो
काश्च तत्स्वनान् बधिरीकृताः ॥ अथागाद्ब्रह्मा येषां तत्र किमेतदिति विस्मितः ॥ तावत्समुद्रस्योत्सं
गे तं बालं स ददर्श ह ॥ ततो ब्रह्माब्रवीद्वाक्यं कस्यायं शिशुरद्भुतः ॥ इति ब्रह्मवचः श्रुत्वा वाक्यं
सिंधुस्तदाब्रवीत् ॥ प्रणम्य शिरसा बालं तस्योत्संगे न्यवेशयत् ॥ भो ब्रह्मन् सिंधुगंगाजातोयं मम
पुत्रकः ॥ जातिकर्मादिसंस्कारान् कुरुष्वास्य जगत्प्रभो ॥ नारद उवाच ॥ इत्येवं वदति पाथो
धौ स बालः सागरात्मजः ॥ ब्रह्माणमग्रहीत् कूर्चे विधुन्वंतं मुहुर्मुहुः ॥ धुन्वंतस्य च कूर्चे
मुनेत्राभ्यामगमज्जलं ॥ कथंचिन्मुक्तकूर्चस्तु ब्रह्मा प्रोवाच सागरं ॥ ब्रह्मोवाच ॥ नेत्राभ्यां विधृ
तं यस्मादनेनैतज्जलं मम ॥ तस्माज्जलंधर इति नाम्ना ख्यातो भविष्यति ॥ अधुनैवैष त
रुणः सर्वशास्त्रानुपारगः ॥ अवध्यः सर्वभूतानां विना रुद्रं भविष्यति ॥ यत एव समुद्भूतस्त १५

त्रैवांतं गमिष्यति ॥ नारद उवाच ॥ इत्युक्त्वा शुक्रमाहूय राज्ये तं चाभ्यषेचयत् ॥ आमंत्र्य सरितां नाथं ब्रह्मांत
र्धानमन्वगात् ॥ अथ तद्दर्शनोत्फुल्लनयनः सागरस्तथा ॥ कालनेमिसुतां वृंदां तस्मै भार्यार्थमयाचत ॥
ते कालनेमिप्रमुखाश्च दानवास्तस्मै सुतां प्रददुः प्रहर्षिताश्च ॥ स चापि तां प्राप्य सुहृद्वरार्थिनीं स
शास सम्यक् शुक्रेण सहायवान् वशी ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जलंधरोत्पत्तिर्नाम नवमोध्या
यः ॥ नारद उवाच ॥ ये देवैर्निर्जिताः पूर्वं दैत्याः पातालसंस्थिताः ॥ तेपि भूमंडलं याता निर्भयास्तमुपा
सिताः ॥ कदाचिच्छिन्नशिरसं दृष्ट्वा राहुं स दैत्यराट् ॥ पप्रच्छ भार्गवं तस्य शिरश्छेदस्य कारणं ॥ स
मथ्यासमुद्रस्य मथनं देवकारितं ॥ रत्नोपहरणं चैव दैत्यानां च पराभवं ॥ स श्रुत्वा क्रोधरक्ताक्षः स्व
पितुर्मथनं तदा ॥ दूतं संप्रेषयामास घस्मरं शक्रसन्निधौ ॥ दूतस्त्रिविष्टपं गत्वा सुधर्मां प्रविश्य त
दा ॥ गर्वादुन्नमितमौलिस्तु देवेंद्रं वाक्यमब्रवीत् ॥ घस्मर उवाच ॥ जलंधरोब्धितनयः सर्वदैत्यजनेश्व

Indira Gandhi National
Centre for the Arts

रः॥ दूतोऽप्रेषितस्तेन स ययौ शक्रसंसदं॥ जलंधर उवाच॥ कस्मात्त्वया मम पिता मथितः सागरोऽद्रि
णा॥ नीतानि सर्वरत्नानि तानि शीघ्रं प्रयच्छ नः॥ इति दूतवचः श्रुत्वा विस्मितस्त्रिदशाधिपः॥
उवाच घस्मरं रोषभयविह्वलरोषितः॥ इंद्र उवाच॥ मत्तो दैत्यमया उद्भूर्वं मथितः सागरो य
क्षि४ था॥ अद्यो मद्रूपात्रस्ताः स्वकुक्षिस्था कृतास्तथा॥ अन्ये च मद्विषस्तेन रक्षिता दितिजा पुरा॥
तस्मात् रत्नजातं तु मयाप्यपहृतं किल॥ शंखोऽप्येवं पुरा देवान्विद्विषन्सागरात्मजः॥ म
मानुजेन निहतः प्रविश्य सागरोदरे॥ तद्गच्छ कथयस्व त्वस्य सर्वं मथनकारणं॥ नारद उवाच॥
इत्थं विसर्जितो दूतस्तदेंद्रेणागमद्द्रुतं॥ तदिदं वचनं सर्वं दैत्यायाकथयत्तदा॥ तन्निशम्य त
दा दैत्यो रोषात्प्रस्फुरिताधरः॥ उद्योगमकरोत् तूर्णं सर्वदेवजिगीषया॥ ततो द्योगस्तु दैत्यस्य दि
ग्भ्यः पातालतस्तथा॥ दितिजाः प्रतिपद्यंते कोटिशः कोटिशस्तदा॥ अथ शुंभनिशुंभाद्यैर्बलवदा १६

धिपकोटिभिः॥ गत्वा त्रिविष्टपं गत्वा दैत्यो नंदनाधिष्ठितो भवत्॥ निर्ययुस्तत्र सर्वस्या देवा युद्धा
य दंशिताः॥ पुरीमाहत्य तिष्ठंतं दृष्ट्वा दैत्यबलं महत्॥ ततः समभवद्युद्धं देवदानवसे
नयोः॥ मुशलैः परिघैः बाणैः गदाशक्तिपरश्वधैः॥ तेन्योन्यसमधावंतौ जघ्नुश्चैव परस्प
रं॥ क्षणेनाभवतां सेन्ये रुधिरौघप्रवर्षिते॥ पतितैः पात्यमानैश्च गजाश्चरथपत्तिभिः॥ व्यरा
जत रणो भूमिः संध्याभ्रपटलैरिव॥ तत्र युद्धे मृतान् दैत्यान्भार्गवस्तूद्तिष्ठपत्॥ विद्यया म
तजीवन्या मंत्रितैस्तोयबिंदुभिः॥ देवानपि तथा युद्धे तत्राजीवयद्गिरा॥ दिव्यौषधीः समा
नीय तद्याद्रेश्च पुनः पुनः॥ दृष्ट्वा देवान्हतान्युद्धे पुनरेव समुत्थितान्॥ जलंधरः क्रोधव
शाद्भार्गवं वीक्ष्य चाब्रवीत्॥ जलंधर उवाच॥ मया युद्धे हता देवा उत्तिष्ठंति कथं पुनः॥ तव सं
जीवनी विद्या नैवान्यत्रेति नः श्रुतं॥ उशना उवाच॥ दिव्यौषधीः समानीय द्रोणाद्रेश्चांगिरास्त
दा॥ क्षिप्रं जीवयते देवान् द्रोणाद्रिं तमुपाहर॥ इत्युक्तेसति दैत्येंद्रो नीत्वा द्रोणाचलं तदा॥ प्रा

Indira Gandhi National
Centre for the Arts

१७ क्षिप्त्वा सागरे तूर्णं पुनर्यगान्महाहवं ॥ २८ ॥ अथ देवान्हतान्दृष्ट्वा द्रोणादिमगमन्सुराः ॥ तावत्तत्र
गिरींद्रः सः मंदराद्रिः सुरार्च्चितः ॥ तौ त्वा दैत्यहतश्रो लांधिषिरोभयविह्वलः ॥ आगत्य दूरा
द्याजगौ भयव्याकुलविग्रहः ॥ पलायध्वं महादैत्यो नायं जेतुं क्षमो यतः ॥ २९ ॥ रुद्रांशसंभवो
४८ ह्येष स्मैधं शक्रचेष्टितं ॥ सत्वा तद्वचनं देवा भयविह्वलितास्तथा ॥ ३० ॥ दैत्येनवध्य
मानास्ते पलायंत दिशो दश ॥ देवान्विद्रावितान्दृष्ट्वा दैत्यः सागरनंदनः ॥ ३१ ॥ शंखभेरीज
यरवैः प्रविवेशामरावतीं ॥ प्रविष्टे नगरीं दैत्ये देवाः शक्रपुरोगमाः ॥ ३२ ॥ सुवर्णाद्रिगुहांप्र
प्राप्यवसन्दैत्यतापिताः ॥ ३३ ॥ ततस्तु सर्वेषु सुराधिकारेष्विंद्रादिकानां व्यनिवेशयत्तदा ॥
शुंभादिकान्दैत्यवरान्पृथक्स्वयं ततः सुवर्णाद्रिगुहामगान्नृप ॥ इति श्रीपद्मपुराणे
कार्त्तिकमाहात्म्ये जलंधरोपाख्याने अमरावतीप्रवेशनं नाम दशमोऽध्यायः ॥ १० ॥ १७

५

नारद उवाच ॥ पुनर्दैत्यं समायांतं दृष्ट्वा देवाः सवासवाः ॥ भयप्रकंपिताः सर्वे विष्णुं स्तोतुं प्रचक्रमुः ॥ देवा ऊ
चुः ॥ नमो मत्स्यकूर्मादिनानास्वरूपैः सदा भक्तकार्योद्यतायार्त्तिहंत्रे ॥ विधात्रादिसर्गस्थितिध्वंस
कर्त्रे गदाशंखपद्मासिहस्ताय तेऽस्तु ॥ २ ॥ रमावल्लभायासुराणां निहंत्रे भुजंगारियानाय पीतांब
राय ॥ मखादिक्रियापाककर्त्रे सुरारण्यभाराय तस्मै नताः स्मो नताः स्मः ॥ नमो दैत्यसंतापिता
मर्त्यदुःखाचलध्वंसदंभोलये विष्णवे ते ॥ भुजंगेशतल्पेशयायार्कचंद्रद्विनेत्राय तस्मै नताः स्मो न
ताः स्मः ॥ ४ ॥ नारद उवाच ॥ संकष्टनाशनं स्तोत्रमेतद्यः स्तु पठेन्नरः ॥ स कदाचिन्न संकष्टैः पीड्य
ते कृपया हरेः ॥ ५ ॥ इति देवाः स्तुतिं तावत्कुर्वंति दनुजार्द्दिताः ॥ तावत्सुराणामापत्तिर्विज्ञाता विष्णुना त
दा ॥ सहसोत्थाय दैत्यारिः कृपयाविन्नमानसः ॥ आरुह्य गरुडं वेगाल्लक्ष्मीं वचनमब्रवीत् ॥ ७ ॥
विष्णुरुवाच ॥ जलंधरेण ते भ्रात्रा सुराणां कदनं कृतं ॥ तैराहूतो गमिष्यामि युद्धायामितराम्वितः ॥ ८ ॥
रुद्रांशसंभवत्वाच्च ब्रह्मणो वचनात्तथा ॥ प्रीत्या तव नैवायं मम वध्यो जलंधरः ॥ ९ ॥ नारद उवाच ॥ इ



Indira Gandhi National Centre for the Arts

१८ पुत्स्कागरुडारूढःशंखचक्रगदाधरः॥विस्नुर्देगाघयोयोद्धुपत्रदेवाःस्तुवंतिते॥१०॥अप्सरसानुजातु
गपक्षवाप्रकंपिताः॥वात्याविवर्तितादैत्याबभ्रमुःखेघनायथा॥११॥ततोजलंधरोदृष्ट्वादैत्यान्वा
णप्रपीडितान्॥उद्धृत्यनयनेक्रोधात्ततोविस्नुंसमभ्यधात्॥१२॥ततःसमभूद्युद्धंविस्नुदैत्येंद्र
योर्महत्॥आकाशंकुर्वतोबाणैःसततंनिरवकाशतां॥१३॥विस्नुर्दैत्यस्यबाणौघैर्ध्वजंछत्रंधनु
र्हयान्॥चिछेदतंचहृदयेबाणेनैकेनताडयेत्॥१४॥ततोदैत्यःसमुत्पत्यगदापाणिस्त्वरान्वि
तः॥आहत्यगरुडंमूर्ध्निपातयामासभूतले॥१५॥विस्नुर्गदांस्वखड्गेनचिछेदप्रहसन्निव॥ता
वत्सहृदयेविस्नुंजघानदृढमुष्टिना॥१६॥ततस्तौबाहुयुद्धेनयुयुधातेपरस्परं॥बाहुभिर्मु
ष्टिभिश्चैवजानुभिर्नादयन्महीं॥१७॥एवंसःसुचिरंयुद्धंकृत्वाविस्नुप्रतापवान्॥उवाचदैत्यराजा
नंमेघगंभीरनिस्वनः॥१८॥विस्नुरुवाच॥वरंवरयदैत्येंद्रप्रीतोस्मितवविक्रमात्॥अदेयमपि १८

तेद्यापियत्तेमनसिवर्त्तते॥१९॥जलंधरउवाच॥यदिभावुकतुष्टोसिमैवरमेनंददस्वमे॥मद्भगिन्यास
हत्वयतथामद्गेहेसगणोवस॥२०॥नारदउवाच॥तथेत्युक्त्वासभगवान्सर्वदेवगणैर्वृतः॥जालंध
रंनामपुरंजगामरमयामह॥२१॥जलंधरश्चदेवानामधिकारेषुदानवान्॥स्थापयित्वासहर्षः
सःपुनरागान्महीतलं॥२२॥देवगंधर्वसिद्धेषुयत्किंचिद्रत्नसंचितं॥तदात्मवशगंकृत्वाऽतिष्ठ
त्सागरनंदनः॥२३॥पातालभुवनेदैत्यंनिशुंभंसमहाबलं॥स्थापयित्वासशेषादीनानयेद्भू
तलंबली॥२४॥देवगंधर्वसिद्धौघान्सर्वराक्षसमानुषान्॥स्वपुरेनागरान्कृत्वासशास
भुवनत्रयं॥२५॥एवंजलंधरःकृत्वादेवान्स्ववशवर्तिनः॥धर्मेणपालयामासप्रजाःपुत्रा
निवौरसान्॥२६॥नकश्चिद्व्याधितोनैवदुःखितोनकृशस्तथा॥नदीनोदृश्यतेतस्मिन्ध
र्मराज्यंप्रशासति॥२७॥एवंमहींशासतितदानवेंद्रेधर्मेणसम्यग्यदृच्छयाहि॥कदाचिदागमेप

Indira Gandhi National
Centre for the Arts

१५ तस्य लक्ष्मीं विलोकितुं श्रीसमेतां च सेवितुं ॥२०॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जलंधरोपाख्या
ने एकादशमोऽध्यायः ॥११॥ शौ नारद उवाच ॥ ततः संपूज्य विधिवद्दानवेंद्रोतिभक्तितः ॥ स
प्रहस्य तदा वाक्यं जगाद नृपसत्तम ॥१॥ कुत आगम्यते ब्रह्मन् किंचिद्दृष्टं त्वया क्वचित् ॥ यदर्थ
त्वमिहायातस्तदाज्ञापय मां मुने ॥२॥ नारद उवाच ॥ गतः कैलासशिखरे दृष्टवानस्मि शंकरं ॥
योजनायुतविस्तीर्णे कल्पद्रुममहावने ॥३॥ कामधेनुशताकीर्णे चिंतामणिसुदीपिते ॥ तद्द
ष्ट्वा महदाश्चर्यं वितर्को मे भवत्तदा ॥४॥ क्वापीदृशी भवेदृद्धिस्त्रिलोक्यां वा न वेति वा ॥ ता
वत्तवापि देवेंद्र समृद्धिः संस्मृता मया ॥ तद्विलोकनकामोऽहं त्वत्सान्निध्यमिहागतः ॥ त्वत्स
मृद्धिमिमां पश्यन् स्त्रीरत्नसहितां ध्रुवं ॥ कल्पयामि शिवादन्य त्रिलोक्यां न समृद्धिमान् ॥
यस्या लावण्यजलधौ निमग्नश्चतुराननः ॥७॥ स्वधैर्यं मुमुचे पूर्वं तया कान्योपमीयते ॥ वीतरा १५

गोपि हि यया मदनारिः स्वलीलया ॥८॥ वीततंत्रोपि हि यतः स्वात्मना वशगः कृतः ॥ कल्पयामि शि
वादन्यस्त्रिलोक्यां न समृद्धिमान् ॥९॥ अप्सरोनागकन्याद्या यद्यपि त्वद्गृहे स्थिताः ॥ तथा
पि तानपार्वत्या रूपेण सदृशा ध्रुवं ॥१०॥ सौंदर्यगहने यामिशर्वरी रूपया पुरा ॥ निःकामाका
मयुक्तोपि स्ववशो विवशः कृतः ॥११॥ यस्याः पुनः पुनः पश्यद्रूपं याता विसर्जने ॥ ससर्जाप्सर
सत्तासां तत्समे कापि नाभवत् ॥ अतस्त्रीरत्नसंभोक्तुः समृद्धिस्तस्य सा वरा ॥ तथा न तव देवें
द्र सर्वरत्नाधिपस्य च ॥१३॥ एवमुक्त्वा तमामंत्र्य गते मयि स दैत्यराट् ॥ तद्रूपश्रवणादासी
दनंगज्वरपीडितः ॥१४॥ प्रथमं प्रेषयामास स दूतं सैंहिकासुतं ॥ त्र्यंबकाय तदा कश्चिद्विष्णु
मायाविमोहितः ॥१५॥ कैलासमगमद्राहुः कुर्वन्शुक्लेंदुवर्चसं ॥ कालेन कृष्णपक्षेंदुवर्चसं
स्वांगजेन तु ॥१६॥ निवेदितस्तु देवेशं नंदिना स प्रवेशितः ॥ त्र्यंबकभ्रूलतासंज्ञाप्रेरितो वा
क्यमब्रवीत् ॥१७॥ राहुरुवाच ॥ देवपन्नगसेव्यस्य त्रैलोक्याधिपतेस्तथा ॥ सर्वरत्नेश्वरस्य त्व का१

Indira Gandhi National
Centre for the Arts

२० मा तां श्रुत्वा वृषध्वज॥१८॥श्मशानवासिनो नित्यमस्थिमालाधरस्य च॥दिगंबरस्य ते भार्या कथं
हैमवती शुभा॥१९॥अहं रत्नाधिनाथोऽस्मि सा च स्त्रीरत्नसंज्ञिता॥तस्मान्ममैव सा योग्या नै
व भिक्षाशिनस्तव॥२०॥नारद उवाच॥वदत्येवं तदा राहौ भ्रूमध्याच्छूलपाणिनः॥अभवत्पु
रुषो रौद्रस्तीव्राशनिसमस्वनः॥२१॥सिंहास्यः प्रललज्जिह्वः सज्वलन्नयनो महान्॥ऊर्द्ध्व
केशः शुष्कतनुर्नृसिंह इव चापरः॥२२॥स तं खादितुमायातं दृष्ट्वा राहुर्भयातुरः॥अधावद
तिवेगेन बहिः स च दधार तं॥राहुरुवाच॥ब्राह्मणं मां महादेव खादितुं समागतः॥महादे
वाभयः कृत्वा ब्राह्मणस्य तदाब्रवीत्॥२४॥धृत्वा खादितुमारब्धस्तावद्रुद्रेण वारितः॥
नैवासौ वध्यतामेति दूतोयं परवान्यतः॥२५॥मुंचेति पुरुषः श्रुत्वा राहुं तत्याज सोंबरे॥
राहुं त्यक्त्वा स पुरुषो महादेवं व्यजिज्ञपत्॥२६॥पुरुष उवाच॥क्षुधा मां बाधते स्वामि
न्क्षुधार्तोऽस्म्यहं सर्वथा॥किं भक्ष्यं ते महादेव तदाज्ञापय मां प्रभो॥२७॥ईश्वर उवाच॥ २०

भक्षयस्वात्मनः शीघ्रं मांसं त्वं हस्तपादयोः॥नारद उवाच॥स शिवेनैवमाज्ञप्तः स्वादत्पुरुषः स्वकं॥२८॥
हस्तपादोद्भवं मांसं शिरःशेषो यथाभवत्॥दृष्ट्वा शिरोवशेषं तं सुप्रसन्नः सदाशिवः॥२९॥पुरुषं
भीमकर्माणं तमुवाच सविस्मयः॥ईश्वर उवाच॥त्वं कीर्तिमुखसंज्ञो हि मम द्वारगः सदा॥त्वत्त्वां
येन कुर्वंति नैव ते मत्प्रियंकराः॥तदा प्रभृति देवस्य द्वारे कीर्तिमुखः स्मृतः॥३१॥नार्चयंति ह
ये पूर्वं तेषामर्च्चा वृथा भवेत्॥राहुर्विमुक्तो यस्तेन सोपतद्बर्बरस्थले॥३२॥अतस्स बर्बरोद्भूत
इति भूमौ प्रथां गतः॥३३॥ततश्च राहुः पुनरेव जातमात्मानमस्मिन्निति मन्यमानः॥स एत्य स
र्वं कथयांबभूव जलंधरायेतद्शिवचेष्टितं यत्॥३४॥इति श्रीपद्मपुराणे कार्त्तिकमहात्म्ये शिव
दूतसंवादो नाम द्वादशोऽध्यायः॥१२॥नारद उवाच॥जलंधरस्ततः श्रुत्वा कोपाकुलितमानसः॥
निर्जगामाशु दैत्यानां कोटिभिः परिवारितः॥१॥गतस्तस्याग्रतः शुक्रो राहुश्च स्थितोऽभवत्॥
मा

Indira Gandhi National
Centre for the Arts

२१ मुकुटश्चापतद्भूमौ वेगात्प्रस्खलितस्तदा ॥२॥ दैत्यसेनाहतैस्तत्र विमानानां शतैस्तदा ॥ अराजतनभ
स्तूर्णं प्रावृषीव यथा घनैः ॥३॥ तस्यां योगं ततो दृष्ट्वा देवाः शक्रपुरोगमाः ॥ अलक्षितास्त्वराज्जग्मुः
श्शूलिनं च विजिज्ञपुः ॥ देवा ऊचुः ॥ न जानासि कथं स्वामिन्देवापत्तिमिमां प्रभो ॥ तदस्मद्रक्षणार्थाय
जहि सागरनंदनं ॥ नारद उवाच ॥ इति देववचः श्रुत्वा प्रहस्य वृषभध्वजः ॥ महाविष्णुं समाहूय व
चनं चेदमब्रवीत् ॥ ईश्वर उवाच ॥ जलंधरः कथं विष्णो न हतः संगरे त्वया ॥ तद्गृहे चापि यातोसि
त्यक्त्वा वैकुंठमात्मनः ॥७॥ श्रीभगवानुवाच ॥ तवांशसंभवत्वाच्च भ्रातृत्वाच्च तथा श्रियः ॥ न मया नि
हतः संख्ये त्वमेनं जहि दानवं ॥८॥ ईश्वर उवाच ॥ नायमेति महातेजा शस्त्राघैर्वध्यते मया ॥ देवैः
सह स्वतेजोंशः शस्त्रार्थं दीयतां मम ॥९॥ नारद उवाच ॥ अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तदा ॥
तान्येकमागतानीशो दृष्ट्वा स्वं च महत्तदा ॥१०॥ तेनाकरोन्महादेवो महत्साशस्त्रमुत्तमं ॥ चक्रं
२१



सुदर्शनं नाम ज्वालामालातिभीषणं ॥११॥ तेजःशेषेण च तदा वज्रं चक्रे तदा हरः ॥ र्त्वजलंधरो दृष्टः कै
लाशतलभूमिषु ॥१२॥ हस्त्यश्वरथपत्तीनां कोटिभिः परिवारितः ॥ तं दृष्ट्वा लक्षिता जग्मुर्देवाः सर्वे
यथागतं ॥१३॥ गताश्च समनस्थं तद्युद्धपातित्वरान्विताः ॥ नंदीभवक्त्रसेनानीमुखाः सर्वे शिवा
नयाः ॥१४॥ अथ ते दुर्गणाः सर्वे कैलासाद्युद्धदुर्मदाः ॥ ततः समभवद्युद्धं कैलासोपत्यकाभुवि ॥१५॥
प्रमथाधिपदैत्यानां घोरं शस्त्रास्त्रसंकुलं ॥ भेरीमृदंगशंखौघनिःस्वनैर्वीरहर्षणैः ॥१६॥ ग
जाश्वरथशब्दैश्च नादिता भूर्व्यकंपत ॥ शक्तितोमरबाणौघमुशलप्रासपट्टिशैः ॥१७॥ अरा
जत नभस्तूर्णमुल्काभिः सृष्टं यथा ॥ निहतैरथनागाश्वैः पत्तिभिर्भूव्यराजत ॥ वज्राहतावचलसि
रश्शकलैरिव संवृता ॥ प्रमथा हतदैत्यौघैर्दैत्या हतगणास्तथा ॥१९॥ वसासृक्मांसपंकाढ्या भूरग
म्या न वन्नदा ॥ प्रमथा हतदैत्यौघान् भार्गवस्समजीवयत ॥२०॥ युद्धे पुनः पुनश्चैवमतः सजीव
नीबलात् ॥ तं दृष्ट्वा व्याकुलीभूता गणाः सर्वे भयार्दिताः ॥२१॥ शशंसुर्देवदेवाय तत्सर्वं शुक्रचे

Indira Gandhi National
Centre for the Arts

निशुंभश्च शुंभो सेनानी ५

२२ चितं॥ अथ रुद्रमुखात्कृत्या बभूवातीव भीषणा॥२२॥ तालजंघोदरी वक्रा स्तनपीडितभूरुहा॥ सा युद्ध
भूमिमासाद्य भक्षयंती महासुरान्॥२३॥ भार्गवं स्वभगे कृत्वा जगामांतर्हिता नभः॥ विद्धं तं भार्गवं
दृष्ट्वा दैत्यसेनागणास्तथा॥ म्लानवदनां दृष्ट्वा निजधूर्युद्धदुर्मदाः॥ अथाभंजत दैत्यानां सेना
गणाभयार्दिता॥२५॥ वायुवेगहता यद्वच्छकीर्णालतासंहतिः॥ भग्नां गणभयात्सेनां दृष्ट्वा मर्षपु
शुंभ५ तापपुः॥२६॥ निशुंभ सेनानी कालनेमिश्च वीर्यवान्॥ त्रयस्ते वारयामासुर्गणसेनां महाबलाः॥२७॥
मुचंतः शरवर्षाणि प्रावृषीव बलाहकाः॥ ततो दैत्यशरौघास्ते शलभानामिव व्रजाः॥२८॥ रुरुधुः खं
दिशः सर्वगणसेनां प्रकंपयन्॥ गणाः शरशतैर्भिन्ना रुधिरासारवर्षिणः॥२९॥ वसंते किंशुका
भासानप्रापतकिंचन॥ पतिताप्राद्रवन्मानाश्च छिन्नाभिन्नास्तथा गणाः॥ त्यक्त्वा संग्रा
मभूमिं ते सर्वे विविमुखाभवन्॥३०॥ ततः प्रभिन्नं स्वबलं विलोक्य शैलादिलंबोदरकार्तिकेयाः॥
ससांत्वितादैत्यबलान्प्रसह्य निवारयासुरमर्दणाले॥३१॥ इति श्रीपद्मपुराणे कार्तिमाहात्म्ये ज २२

लंधरोपाख्याने दैत्यासेनावधो नाम त्रयोदशोध्यायः॥१३॥ नारद उवाच॥ ते गणाधिपतीन्दृष्ट्वा
नंदीभमुखषण्मुखान्॥ अमर्षादभ्यधावंत द्वंद्वयुद्धाय दानवाः॥१॥ नंदिनं कालनेमिस्तु शुंभो
लंबोदरं तथा॥ निशुंभः षण्मुखं वेगादभ्यधावत दर्शितः॥२॥ निशुंभः कार्तिकेयस्य मयूरं प
चभिः शरैः॥ हृदि विव्याध वेगेन मूर्छितस्य पपात ह॥ ततः शक्तिधरः शक्तिं पावकार्काभ रोषि
तः॥ तावन्निशुंभो वेगेन स्वशरैस्तां न्यपातयत्॥४॥ ततो नंदी स्ववरो बाणैः कालनेमिम
वध्यत॥ स तन्निश्चरत्याश्च केतुमीषां सारथिमच्छिनत्॥५॥ कालनेमिस्ततः क्रुद्धो धनुश्छित्त्वा
दनंदिनः॥ तदप्यस्य स शूलेन नतं वक्षस्यहन् दृढं॥६॥ स शूलभिन्नहृदयो हताश्वो हतसा
रथिः॥ अद्रेः शिखरमादाय शैलादिं सोप्यपातयत्॥७॥ अथ शुंभो गणेशश्च रथमूषक
वाहनौ पुरुमानौ शरजालैः परस्परमयुध्यतां॥ गणेशस्तु ततः शुंभं हृदि विव्याध पत्रिणा॥
सारथिं च त्रिभिर्बाणैः पातयामास भूतले॥९॥ ततोतिक्रुद्धः शुंभोपि बाणवर्षाग्गणाधिपं॥

Indira Gandhi National
Centre for the Arts

२३

मूषकंचत्रिभिर्विध्वाननादजलदस्वनः॥१०॥मूषकःशरभिन्नोऽगाद्बालहठवेदनः॥लंबोदरश्च
पतितःपदातिरभवन्नृप॥११॥ततोलंबोदरःक्रुद्धोहत्वापरशुनाहृदि॥अपातयत्तदाभूमौमूषकं
चारुहत्सुनः॥१२॥कालनेमिर्निशुंभश्चजघ्नौलंबोदरंशरैःयुगपज्जघ्नतुःक्रोधात्तावैरावमहा
द्विपं॥१३॥तंपीड्यमानमालोक्यवीरभद्रोमहाबलः॥अभ्यधावत्तवेगेनभूतकोटिपुतस्तथा॥१४॥
कुष्मांडाभैरवाश्चापिवेतालायोगिनीगणाः॥पिशाचाडाकिनीसंघागणाश्चापितमन्वयुः॥१५॥
ततःकिलकिलाशब्दैःसिंहनादैसघर्घरैः॥विनादिताऽभवत्कंपःपृथिवीसमकंपयत्॥१६॥ततो
भूतान्यधावंतभक्षयंतिस्मदानवान्॥उत्पततिपततिस्मननर्तुश्चरणांगणे॥१७॥नंदिश्च
कार्तिकेयश्चसमाश्वास्यत्वरान्वितौ॥निजभ्रनुरणोद्देस्यान्निरंतरशरव्रजैः॥१८॥छिन्न
भिन्नहतैर्दैत्यैःपतितैर्भक्षितैस्तथाव्याकुलासाभवत्सेनाविषमंवस्नातदा॥१९॥प्रविध्व
स्तांतदासेनांदृष्ट्वासागरनंदनः॥रथेनाग्निपताकेनगणानभिमुखोययौ॥२०॥हस्त्यश्वर २३



थसंहाराःशरवभेरिरवास्तथा॥अभवंसिंहनादश्चसेनयोरुभयोस्तदा॥२१॥जलंधरशरव्रातैर्नीहारपट
लैरिव॥घावापृथिव्योरोघछन्नमंतरंसमपद्यत॥२२॥गणोशांपंचभिर्विध्वाशैलादिंनवभिःशरैः॥वी
रभद्रंचविंशत्याननादजलदस्वनः॥रथेनाग्निपताकेनगणानभिमुखोययौ॥२३॥कार्तिकेयस्ततो
दैत्यंशक्त्याविव्याधसत्वरः॥स्तुघूर्णशक्तिनिर्भिन्नःकिंचिद्व्याकुलमानसः॥२४॥ततःकोपपरीता
क्षःकार्त्तिकेयंजलंधरः॥गदयाताडयामासचभूमितलेपतत्॥२५॥तथैवनंदिदनंवेगाद
पातयत्भूतले॥ततोगणेश्वरःक्रुद्धोगदांपरशुनाछिनत्॥२६॥वीरभद्रस्त्रिभिर्बाणैःहृदिवि
व्याधदानवं॥सप्तभिश्चाश्वहयान्केतुंधनुःछत्रंचचिच्छिदे॥२७॥ततोतिक्रुद्धोदैत्येंद्रःशक्तिमु
घम्यदारुणां॥गणेशंताडयामासरथमन्यंसमारुहत्॥२८॥अभ्यगाद्दद्वेगेनवीरभद्रंरुषा
न्वितः॥ततस्तौशूर्पसंकाशौयुयुधातेपरस्परं॥२९॥वीरभद्रंपुनस्तस्यहयान्बाणैरपातयत्॥

Indira Gandhi National
Centre for the Arts

२४ धनुश्चिच्छेद दैत्यः पुनर्वे परिघायुधः ॥३०॥ नारद उवाच ॥ स वीरभद्रस्तरसा जघानाभिगम्य दैत्यः
परिघेन मूर्द्ध्नि ॥ स चापि वीरः प्रविभिन्नमूर्द्धा पपात भूमौ रुधिरं समुद्गिरन् ॥३१॥ इति श्रीपद्म
पुराणे कार्त्तिकमाहात्म्ये सैन्यवधो नाम चतुर्दशोऽध्यायः ॥१४॥ नारद उवाच ॥ पतितं वीरभद्रं तु दृष्ट्वा
रुद्रगणा भयात् ॥ आगतास्ते रणं हित्वा क्रोशमाना महेश्वरं ॥ हरः कोलाहलं श्रुत्वा गणानां च
द्रुतमक्षरः ॥ आययौ वृषमारूढः संग्रामं प्रहसन्निव ॥२॥ रुद्रमायान्तमालोक्य सिंहनादैर्गणाः पुनः ॥
निवृत्ताः संगरे दैत्यान्निजघ्नुः शरवृष्टिभिः ॥३॥ दैत्याश्च भीषणं रुद्रं दृष्ट्वा सर्वे विदुद्रुवुः ॥ का
र्त्तिकव्रतिनं दृष्ट्वा पातकानीव तद्भयात् ॥४॥ अथ जालंधरो दैत्यान् विद्रुतान्वीक्ष्य संगरे ॥
सोऽधावच्चण्डीशं मुञ्चन्बाणान्सहस्रशः ॥५॥ शुंभो निशुंभ प्रमुखा कालनेमिबलाहकाः ॥
खड्गरोमा प्रचंडश्च घस्मरश्च शिवं ययुः ॥६॥ बाणांधकारसंछन्नं दृष्ट्वा गणबलं शिवः ॥ २४

बाणजालमवच्छिद्य स्वबाणैराववृणोन्नभः ॥७॥ दैत्यांश्च बाणवात्याभिः पीडितानकरोत्तदा ॥ प्रचंडबा
णजालौघैर्भूतले तानपातयत् ॥८॥ खड्गरोमाणः शिरः कायात्तदा परशुनाच्छिनत् ॥ बलाह
कस्य च शिरः खट्वांगेनाकरोद्द्विधा ॥९॥ बद्ध्वा च घस्मरं दैत्यं पाशेनाम्बरनंदुवि ॥ वृषभेन
हताः केचित्केचिद्बाणैर्निराकृताः ॥१०॥ नशेकुरसुराः स्थातुं गजाः सिंहार्दिता इव ॥ ततः कोपपरी
तात्मा वेगाद्युद्धं जलंधरः ॥११॥ आह्वयामास समरे तीआशानि समस्वनः ॥ जलंधर उवाच ॥
युध्यस्व ह्यमया सार्द्धं किमेभिर्निहितैस्तव ॥१२॥ यच्च किंचिद्बलं तेऽस्ति तद्दर्शय जटाधर ॥१
नारद उवाच ॥ इत्युक्त्वा बाणसप्तत्या जघान वृषभध्वजं ॥१३॥ तानप्राप्तान् छित्त्वा बाणैः शिवः
स३ द प्रहसन्निव ॥ ततो हयान् ध्वजं छत्रं धनुश्चिच्छेद सप्तभिः ॥१४॥ स च्छिन्नधन्वा विरथो गदामु
द्यम्य वेगवान् ॥ अभ्यधावच्छिवस्तावत् गदां द्विधाकरोत् ॥१५॥ तस्याप्यमुं बिंदुमपराश्वपरारुहजि
घांसया ॥ तावद्बाणेन बाणौघैः क्रोशमात्रमपाकृतः ॥१६॥ ततो जलंधरो दैत्यो मत्वा रुद्रं बला

Indira Gandhi National
Centre for the Arts

२५ धिकं ॥ ससर्ज मायां गांधर्वमद्भुतां रुद्रमोहिनीं ॥ १७ ॥ ततो जगुश्च ननृतुर्गांधर्व्यप्सरसां गणाः ॥ ता
लवेणुमृदंगाश्च वादयंतस्तथापरे ॥ १८ ॥ तं दृष्ट्वा महदाश्चर्यं रुद्रो नादृक्किनोकितः ॥ पतिता
न्यपि शस्त्राणि करेभ्यो न विवेद सः ॥ १९ ॥ एकाग्रीभूतमालोक्य रुद्रं दैत्यो जलंधरः ॥ का
मार्तः स जगामाशु यत्र गौरी स्थिताभवत् ॥ २० ॥ शुंभे शुंभ निशुंभाख्यौ स्थापयित्वा महा
बलौ ॥ दशदोर्दंडपंचास्य त्रिनेत्रश्च जटाधरः ॥ २१ ॥ महावृषभमारूढः स बभूव जलंध
रः ॥ अथ रुद्रं समायांतं विलोक्य भववल्लभा ॥ २२ ॥ अभ्यायपौ सखीमध्यात्तद्दर्शनपथे
भवत् ॥ यावद्ददर्श चार्वंगीं पार्वतीं दनुजेश्वरः ॥ २३ ॥ तावत्सवीर्यं मुमुचे जडांगश्चाभव
त्तदा ॥ अथ ज्ञात्वा तदा देवी दानवं भयविह्वला ॥ २४ ॥ जगामांतर्हिता वेगात्सा तदोत्तरमान
सं ॥ तामदृष्ट्वा ततो दैत्यः क्षणाद्विद्युल्लतामिव ॥ २५ ॥ जवेनागात्पुनर्युद्धं यत्र देवो वृषध्वजः ॥ २५

पार्वत्यपि महाविष्णुं सस्मार मनसा तदा ॥ २६ ॥ तावद्ददर्श तं देवं सोपविष्टं समीपगं ॥ श्रीपार्वत्युवाच ॥
विष्णो जलंधरो दैत्यः कृतवान्परमद्भुतं ॥ २७ ॥ तत्किं न विदितं तेस्ति चेष्टितं तस्य दुर्मतेः ॥ श्रीभग
वानुवाच ॥ तेनैव दर्शितः पंथा वयमप्यनुवर्यामिहे ॥ २८ ॥ नान्यथा स भवेद्वध्यः पातिव्रत्येन सुरक्षि
तः ॥ नारद उवाच ॥ जगाम विष्णुरित्युक्त्वा पुनर्जालंधरं पुरं ॥ अथ रुद्रश्च गांधर्वाद्विमुक्तः सं
गरे स्थितः ॥ अंतर्धानगतां मायां दृष्ट्वा स बुबुधे तदा ॥ ३० ॥ ततः शिवो विस्मितमानसो पुनर्जगा
म युद्धाय जलंधरं रुषा ॥ स चापि दैत्यः पुनरागतं शिवं दृष्ट्वा शरौघैः समवाकिरद्रणे ॥ ३१ ॥ इति
श्रीपद्मपुराणे कार्तिकमाहात्म्ये जलंधरोपाख्याने संग्रामो नाम पंचदशोध्यायः ॥ १५ ॥ नारद उ
वाच ॥ विष्णुर्जालंधरं गत्वा तद्दैत्यपुटभेदनं ॥ पातिव्रत्यस्य भंगाय वृंदायाश्चाकरोन्मतिं ॥ १ ॥ अ
थ वृंदा तु सा देवी स्वप्नमध्ये ददर्श ह ॥ भर्तारं महिषारूढं तैलाभ्यक्तं दिगंबरं ॥ २ ॥ कृष्णप्रसू

२६ नभूषाभं कृष्यादगणसेवितं ॥ दक्षिणाशांगतं मुंडं तैलाभ्यक्तं दिगंबरं ॥ ३ ॥ खपुरं सौरे मग्नं ग१
सह सैवाम्नना सह ॥ ततः प्रबुद्धा सा बाला तं स्वप्नमचिंतयत् ॥ ४ ॥ ददर्शोदित मादित्यं सच्छिद्रं नि
ष्प्रभं मुहुः ॥ तदनिष्टमिति ज्ञात्वा रुदती भयविह्वला ॥ ५ ॥ कुत्रचिन्नालभे शर्म गोपुराट्टालभू
मिषु ॥ ततः सखीद्वयपुता नगरोद्यानमागमत् ॥ ६ ॥ तत्रापि सा ततो बाला नालभत्कुत्रचित्सुखं
वनाद्वनांतरं यांती नैव वेदात्मनस्तदा ॥ ७ ॥ ततः सा भ्रमती बाला ददर्शातीव भीषणौ ॥ राक्षसौ
सिंहवदनौ दंष्ट्रानयनभासुरौ ॥ ८ ॥ तौ दृष्ट्वा विह्वलातीव पलायनपराभवत् ॥ ददर्श तापसं शां ग४
तं मौनिं शिष्यमौनमास्थितं ॥ ९ ॥ ततस्तत्कंठमासाद्य निजां बाहुलतां भयात् ॥ मुने मां रक्ष शर
णमागतामित्यभाषत ॥ १० ॥ मुनिस्तां विह्वलां दृष्ट्वा राक्षसानुगतां तदा ॥ हुंकारेणैव तौ घो
रौ चकार विमुखौ रुषा ॥ ११ ॥ तद्धुंकारभयत्रस्तौ दृष्ट्वा तौ विमुखौ गतौ ॥ प्रणम्य दंडवद्भूमौ वृंदा २६

वचनमब्रवीत् ॥ वृंदोवाच ॥ रक्षिताहं त्वया घोराद्भयादस्मात्कृपानिधे ॥ किंचिद्विज्ञापुमिच्छा
मि कृपया तन्निशामय ॥ १३ ॥ जलंधरो हि मे भर्ता रुद्रं योद्धुं गतः प्रभो ॥ स तत्रास्ते कथं
युद्धे तन्मे कथय सुव्रत ॥ १४ ॥ नारद उवाच ॥ मुनिस्तद्वाक्यमाकर्ण्य कृपयोर्ध्वमवैक्षत ॥
तावत्कपी समायातौ तं प्रणम्याग्रतः स्थितौ ॥ १५ ॥ ततस्तद्भ्रूलतासंज्ञानियुक्तौ गगनं ग
तौ ॥ गत्वा क्षणार्द्धादागत्य वानरावग्रतः स्थितौ ॥ १६ ॥ शिरः कबंधहस्तौ च दृष्ट्वाब्धित
नयसा ॥ पपात मूर्छिता भूमौ भर्तृव्यसनदुःखिता ॥ १७ ॥ कमंडलजलैः सिक्ता मुनिना
श्वासिता ह्यतौ ॥ स्वभर्तृभाले सभाले कृत्वा दीना रुरोद ह ॥ १८ ॥ वृंदोवाच ॥ यः पुरा सु
खसंवादविनोदयसि मां प्रभो ॥ स कथं न वदस्यद्य वल्लभां मामनागसं ॥ येन देवाः सगं
धर्वा निर्जिता विष्णुना सह ॥ १९ ॥ स कथं तापसेन त्वं त्रैलोक्यविजयी हतः ॥ २० ॥ नार
द उवाच ॥ रुदितं त्वेति तद्वचः प्राह तं मुनिर्वाक्यमब्रवीत् ॥ वृंदोवाच । कृपानिधे मुनिश्रेष्ठ

Indira Gandhi National Centre for the Arts

२७

जीवयैनं ममप्रियं ॥२१॥ त्वमेवास्य पुनः शक्तो जीवनाय मतो मम ॥ नारद उवाच ॥ इति तद्वाक्य
माकर्ण्य प्रहसन्मुनिरब्रवीत् ॥ मुनिरुवाच ॥ नायं जीवयितुं शक्यो रुद्रेण निहतो युधि ॥
तथापि त्वत्कृपाविष्ट एनं संजीवयाम्यहं ॥ नारद उवाच ॥ इत्युक्त्वांतर्द्धे यावत्तावत्सा
गरनंदनः ॥ वृंदामालिंग्य सप्रेम चुचुंबे प्रयतमानसः ॥२४॥ अथ वृंदापि भर्त्तारं दृष्ट्वा हर्षि
तमानसा ॥ रेमे तद्वनमध्यस्था तद्युक्ता बहुवासरं ॥२५॥ कदाचित्सुरतस्यांते दृष्ट्वा वि
ष्णुं तमेव हि ॥ निर्भर्त्स्य क्रोधसंयुक्ता वृंदा वचनमब्रवीत् ॥ वृंदोवाच ॥ धिक् तवेदं हरे
शीलं परदाराभिगामिनः ॥ ज्ञातोसि त्वं मया सम्यक् मायाप्रच्छन्नतापसः ॥२७॥ यौ त्व
या मायया दासौ स्वकीयौ दर्शितौ मम ॥ तावेव राक्षसौ भूत्वा भार्यां तव हरिष्य
तः ॥२८॥ त्वं चापि भार्यादुःखार्त्तो वने कपिसहायवान् ॥ भ्रमन्सर्पेश्वरेणायं यज्ञेति

२७

ब्प१

त्वमागतः ॥२९॥ नारद उवाच ॥ इत्युक्त्वा सा तदा वृंदा प्राविशद्धव्यवाहनं ॥ विष्णुना वार्यमा
णापि तस्मिन्नासक्तमानसा ॥३०॥ ततो हरिस्तामनुसंस्मरन्मुहुः वृंदाचिताभस्मरजोवगुंठि
तः ॥ तत्रैव तस्थौ सुरसिद्धसंघैः ॥ प्रबोध्यमानोपि ययौ न शांतिं ॥३१॥ इति श्रीपद्मपुराणे
कार्त्तिकमाहात्म्ये वृंदायां विष्णुसाक्षात्कारो नाम षोडशोध्यायः ॥१६॥ ततो जलंधरो दृष्ट्वा
रुद्रमद्भुतविक्रमं ॥ चकार मायया गौरीं त्र्यंबकं मोहयन्निव ॥१॥ रथोपरिगतां दृष्ट्वा रुदतीं
पार्वतीं शिवः ॥ निशुंभशुंभदैत्यैश्च बध्यमानां ददर्श सः ॥२॥ गौरीं तथाविधां दृष्ट्वा शिवोप्यु
द्विग्नमानसः ॥ अवाङ्मुखः स्थितस्तूष्णीं विस्मृत्य स्वपराक्रमं ॥३॥ ततो जलंधरो वेगात्त्रि
भिर्विव्याध सायकैः ॥ आपुंखमग्नास्ते रुद्रशिरस्युरसि चोदरे ॥४॥ ततो ज्ञात्वा सती मायां विष्णुना
समबोधितः ॥ रौद्ररूपधरो जातो ज्वालामालातिभीषणः ॥५॥ ततस्तं प्रेक्ष्य रौद्रं तं स्तयोः
शुंभनिशुंभयोः ॥ भयप्रसादपाक्रांतौ गौर्या वध्यौ भविष्यतः ॥६॥ पुनर्जलंधरो गाढं वर्षनि
वे१

Indira Gandhi National Centre for the Arts

शितैः शरैः॥ बाणांधकारसंछन्नं दृष्ट्वा स्वबलं महत्॥ यावद्रुद्रस्य विच्छेदं तस्य बाणान्त्वरा
न्वितान्॥ तावत्स परिघेणाशु जघान वृषभं बली॥९॥ वृषभस्तेन प्रहारेण पपात तोरणाङ्गणात्॥
रुद्रेणाकृष्यमाणोऽपि विनतस्यापि रणभूमिषु॥१०॥ ततः परमसंक्रुद्धो रुद्रो रौद्रवपुर्धरः॥ चक्रं
सुदर्शनं वेगात् चिक्षेपाग्निसमवर्चसं॥११॥ प्रदहन्रोदसी वेगात् तदा सा घजलंधरं॥ जहा
र तच्छिरः कायात् महद्गिरितलोपमं॥१२॥ रथात्कायः पपातोर्व्यां नादयन्वसुधातलं॥ तेज
श्च निर्गतं देहात्तद्रुद्रे लयमागमत्॥१३॥ वृन्दादेहोद्भवं तेजस्तस्मिंर्योम्नि लयं गतं॥ अथ ब्र
ह्मादयो देवा हर्षोत्फुल्ललोचनाः॥१४॥ प्रणम्य शिरसा रुद्रं शशंसुर्विष्णुचेष्टितं॥ दे
वा ऊचुः॥ महादेव त्वया देवा रक्षिता महतो भयात्॥१५॥ किंचिदन्यत्समुद्भूतं तत्र किं कर
वामहे॥ वृन्दालावण्यसंभ्रान्तो विष्णुस्तिष्ठति मोहितः॥१६॥ रुद्र उवाच॥ गच्छध्वं शरणं दे
वाः विमोहच्छेदनाय वै॥ शरण्या मोहिनी माया सा वः कार्यं करिष्यति॥१७॥ इत्युक्त्वांतर्दधे २८
ति

देवैः सह भूतगणैस्तथा॥ देवाश्च तुष्टुवुर्मूलप्रकृतिं भक्तवत्सलां॥१८॥ देवा ऊचुः॥ यदुद्भवाः
सत्वरजस्तमोगुणाः सर्गस्थितिध्वंसनिदानकारणाः॥ यदिच्छया विश्वमिदं भवाभवौ
तनोति मूलप्रकृतिं नताः स्मतां॥१९॥ पाहि त्रयोविंशतिभेदसंस्थितैर्जगत्समग्रं समधि
ष्ठितापरा॥ यद्रूपकर्माणि जगत्त्रयेऽपि ते देवा न विदुः प्रकृतिं नताः स्मतां॥२०॥ यद्भक्तियु
क्ताः पुरुषास्तु नित्यं दारिद्र्यधीमोहपराभवादीन्॥ न प्राप्नुवंत्येव हि भक्तवत्सलां सदैव मू
लप्रकृतिं नताः स्मतां॥२१॥ नारद उवाच॥ स्तोत्रमेतत्त्रिसंध्यं यः पठेदेकाग्रमानसः॥ दारि
द्र्यमोहदुःखानि न कदाचित्स्पृशंति तं॥२२॥ इति स्तुवंतस्ते देवास्तेजोमंडलमास्थितं॥ द
दृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं॥२३॥ तन्मध्याद्भारतीं सर्वे शुश्रुवुर्व्योमचारिणीं॥
अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः॥२४॥ गौरी लक्ष्मीः सुरा चेति रजःसत्वतमोगु
दोः॥ तत्र गच्छत वः कार्यं विधास्यंते च ताः सुराः॥२५॥ इत्युक्तामिति तां वाचं मंतर्धानमगान्महः॥

२९ देवानादिस्मयोत्फुल्लनेत्राणां तत्र हान्त्प ॥२५॥ ततः सर्वेपि ते देवाः श्रुत्वा तद्वाक्यमोदिताः ॥ गौरी
लक्ष्मीसुरांचेति प्रणेमुर्भक्तितत्पराः ॥२६॥ ततस्तां तान्सुरानन्द्वाप्र...ता भक्तवत्सलाः
बीजानि प्रददुस्तेभ्यो वाक्यान्तु चुश्च भूमिप ॥२७॥ देव्य ऊचुः ॥ इमानि तत्र बीजानि विष्णु
र्यत्राव तिष्ठति ॥ निर्वपध्वं ततः कार्यं भवतां सिद्धिमेष्यति ॥२८॥ नारद उवाच ॥ ततस्तुह
ष्टाः सुरासिद्धसंघाग्रगृह्य बीजानि निचिक्षिपुश्च ॥ ... चिता भूमितले स पत्र विष्णुः स
हा तिष्ठति सोम्यवृत्तिः ॥२९॥ इति श्रीपद्मपुराणे कार्त्तिकमहात्म्ये जलंधरवधोनाम सप्त
दशोऽध्यायः ॥१७॥ नारद उवाच ॥ क्षिप्तेभ्यस्तत्र बीजेभ्यो वनस्पत्यस्त्रयो भवन् ॥ धात्री
च मालती चैव तुलसी च नृपोत्तम ॥१॥ धात्र्युद्भवास्मृता धात्री ...भवा मालती स्मृता ॥ गौ
रीभवा च तुलसी तमः सत्वरजोगुणाः ॥२॥ स्त्रीरूपिणो वनस्पत्यो दृष्ट्वा विष्णुस्तदान्तप ॥ २९

महा

उत्तस्थौ सम्भ्रमाद्रूपातिशय...विभ्रमात् ॥३॥ दृष्ट्वा च ताभ्योहाक्रामासक्तेन चेतसा ॥ तं चापि तुलसीधा
त्र्यौ रागेणैवावलोकतं ॥४॥ यच्च लक्ष्म्या पुरा बीजमीर्ष्ययैव समार्पितं ॥ तस्मात्तदु...द्भवा नारी तस्मिन्नी
र्ष्या...युता भवत् ॥५॥ ततः सा बर्बरीत्याख्यामवाप दृतिगर्हिता ॥ धात्रीतुलस्योस्त द्रागात्तस्य प्रीतिप्र
देसदा ॥६॥ ततो विस्मृत दुःखोसौ विष्णुस्ताभ्यां सहैव तु ॥ वैकुंठमगमद्...ष्टः सर्वदेवनमस्कृतः ॥७॥
कार्त्तिकोद्यापने विष्णोस्तस्मात्पूजा विधीयते ॥ तुलसीमूलदेशे तु प्रीतिदा सा यतः स्मृता ॥८॥ तुल
सीकाननं राजन्गृहे यस्यावतिष्ठतो ॥ तद्गृहं तीर्थरूपं तु न यांति यमकिंकराः ॥९॥ सर्वपापहरं पुण्यं
कामदं तुलसीवनं ॥ रोपयंति नरश्रेष्ठ न ते ... भा...स्करिं ॥१०॥ दर्शनं नर्मदायास्तु गंगास्नानं
तथैव च ॥ तुलसीवनसंसर्गसममेतत्त्रयं स्मृतं ॥११॥ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृ
णां ॥ तुलसी हरते पापं वाङ्मनःकायसंचितं ॥१२॥ तुलसीमंजरीभिर्यः कुर्याद्धरिहरार्चनं ॥ मन



Indira Gandhi National Centre for the Arts

३०

गर्भगृहं याति मुक्तिभागी न संशयः ॥१३॥ पुष्करादीनि तीर्थानि गंगाद्याः सरितस्तथा ॥ वासुदेवादयो देवा तिष्ठंति तुलसीदले ॥१४॥ तुलसीमंजरीयुक्तो यस्तु प्राणान्विमुंचति ॥ यमोपि नेक्षितुं शक्तो युक्तः पापशतैरपि ॥१६॥ तुलसीकाष्ठजं यस्तु चंदनं धारयेन्नरः ॥ न देहं न स्पृशेत्पापं क्रियमाणमपीह यत् ॥१७॥ तुलसीविपिनच्छाया यत्र यत्र भवेन्नृप ॥ तत्र श्राद्धं प्रकुर्वीत पितॄणां दत्तमक्षयं ॥१८॥ धात्रीच्छायासु यः कुर्यात्पिंडदानं नृपोत्तम ॥ मुक्तिं प्रयांति पितरस्तस्य च नरके स्थिताः ॥१९॥ मूर्ध्नि पाणौ मुखे चैव देहे च नृपसत्तम ॥ धत्ते धात्रीफलं यस्तु स विज्ञेयो हरिः स्वयं ॥२०॥ धात्रीफलं च तुलसी मृत्तिका द्वारकोद्भवा ॥ यस्य गेहे स्थिता नित्यं स जीवन्मुक्त उच्यते ॥२१॥ धात्रीफलैस्तु संमिश्रैस्तुलसीपत्रमिश्रितैः ॥ जले स्नाति नरस्तस्य गंगास्नानफलं स्मृतं ॥२२॥ देवार्चनं नरः कुर्याद्धात्रीपत्रैः फलैरपि ॥ सुवर्णपुष्पैर्विविधैरर्चनस्याप्नुयात्

३०

फलं ॥२३॥ तीर्थानि मुनयो देवा यज्ञाः सर्वेपि कार्त्तिके ॥ नित्यं धात्रीं समाश्रित्य तिष्ठंत्यर्के तुलास्थिते ॥२४॥ द्वादश्यां तुलसीपत्रं धात्रीपत्रं तु कार्त्तिके ॥ लुनाति स नरो गच्छेन्निरयानतिगर्हितान् ॥२५॥ धात्रीच्छायां समाश्रित्य कार्त्तिके न्नं भुनक्ति यः ॥ अन्नसंसर्गजं पापं भावं वैतस्य गच्छति ॥२६॥ धात्रीमूले तु यो विष्णुं कार्त्तिकेऽर्चयते नरः ॥ विष्णुक्षेत्रेषु सर्वेषु पूजितस्तेन सर्वदा ॥२७॥ धात्रीतुलस्यो माहात्म्यमपि देवश्चतुर्मुखः ॥ न समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः ॥२८॥ धात्रीतुलस्युद्भवकारणं यश्शृणोति यः श्रावयते च भक्त्या ॥ विधूतपाप्मा सह पूर्वजैः स स्वर्गं व्रजत्यर्कविमानसंस्थः ॥२९॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये धात्रीतुलस्युत्पत्तिर्नामाष्टादशोऽध्यायः ॥१८॥ पृथुरुवाच ॥ सेतिहासमिदं ब्रह्मन्माहात्म्यं कथितं त्वया ॥ अत्याश्चर्यमिदं प्रोक्तं ऊर्जव्रतिनः पुण्यफलमद्भुतमीरितं ॥ तत्पुनर्ब्रूहि माहात्म्यं सम्यक् तुलस्याः श्रुतं मया ॥१॥ यदूर्जव्रतिनः

Indira Gandhi National
Centre for the Arts

३१ केनचीर्णमिदं तथा॥ नारद उवाच॥ आसीत्सह्यादिविषये करवीरपुरे पुरा॥ आलरोग धर्मवित्कश्चित्तध
र्मदत्त इति स्मृतः॥३॥ विष्णुव्रतकरः सम्यक् विष्णुपूजारतः सदा॥ द्वादशाक्षरविद्यायां जपनिष्ठो
तिथिप्रियः॥४॥ कदाचित्कार्तिके मासि हरिजागरणाय सः॥ रात्र्यां तुर्यांशशेषायां जगाम हरिमंदि
रं॥५॥ हरिपूजोपकरणान् गृहीत्वा व्रजता तदा॥ तेन दृष्टा समायांता राक्षसी भीमनिस्वना॥६॥ वक्रदं
ष्ट्रालललज्जिह्वा निमग्नारक्तलोचना॥ दिगंबरा शुष्कमांसा लंबोष्ठी घर्घरस्वना॥७॥ तां दृष्ट्वा भय
वित्रस्तः कंपितावयवस्तदा॥ पूजोपकरणैर्वेगात्स यो निध्याहनत्रुषा॥८॥ संस्मृत्य पद्धरेर्नाम
तुलसीयुक्तवारिणा॥ सो हनत्सा तकंपस्मात्तस्मात्तस्याः पातकं गतं॥९॥ अथ संस्मृत्य सा पूर्व
जन्मकर्मविपाकजं॥ स्वां दशां मब्रवीद्विप्रं दंडवत्प्रणिपत्य सा॥१०॥ कलहा उवाच॥ पूर्वकर्म
विपाकेन दशामेतां गतास्म्यहं॥ तत्कथं तु पुनर्विप्र याम्यहं गतिमुत्तमां॥११॥ नारद उवाच॥ तां ३१

दृष्ट्वा प्रणतां मार्तां वदमानां स्वकर्म तत्॥ अतीव विस्मितो विप्रस्तदा वचनमब्रवी॥१२॥ धर्मदत्त उवाच॥
केन कर्मविपाके त्वं दशामीदृशीं गता॥ कुतस्त्वा का च किंशीला तत्सर्वं कथयस्व मे॥१३॥ कलहा उवाच॥
सौराष्ट्रनगरे ब्रह्मन् भिक्षुर्नामाभवद्द्विजः॥ तस्याहं गृहिणी पूर्वं कलहाख्यातिभीषणा॥१४॥ न कदा
चिन्मया भर्तुर्वचसापि शुभं कृतं॥ नार्पितं तस्य मिष्टान्नं भर्तुर्वचनशीलया॥१५॥ कलहप्रियया नि
त्यं मनोद्वेगकरी सदा॥ परिणेतुं ततोन्यां स मतिं चक्रे पतिर्मम॥१६॥ ततो गरं समासाद्य प्राणास्त्यक्ता मया
द्विज॥ अथ बध्वा बध्यमानां मां च निन्युर्यमानुगाः॥१७॥ यमश्च मां तदा दृष्ट्वा चित्रगुप्तमपृच्छत॥ पम
उवाच॥ अनया किं कृतं कर्म चित्रगुप्त विलोकय॥१८॥ प्राप्नोत्वेषा च किं कर्म शुभं वाप्यथवा शुभं॥ चित्र
गुप्तस्तदा वाक्यं भर्त्सयन्मामुवाच ह॥१९॥ चित्रगुप्त उवाच॥ अनया तु शुभं कर्म कृतं किंचिन्न विद्यते॥
मिष्टान्नं भुंजमाने यं न भर्त्रे रितं दर्पितं॥२०॥ अतस्तु वल्गुलीयोन्यां सा स्वविष्ठा दावतिष्ठतु॥ भर्तृद्वेषात्
तथेषा नित्यं कलहकारिणी॥२१॥ विष्ठादा शूकरी योन्यां तस्मात्तिष्ठत्विय सदा॥ पाकभांडे सदा भुक्ते गुप्ता

Indira Gandhi National
Centre for the Arts

चैकापतस्ततः॥२२॥तस्मादेषाविडालीस्यात्स्वजातापत्यभक्षिणी॥१भर्त्तारमपितूद्दिश्यह्यात्मघातःकृतो
मया॥२३॥तस्मात्प्रेतशरीरेपितिष्ठत्येषातिनिंदिता॥अतश्चैषामरूदेशेप्रापितस्याभटैर्हरेः॥२४॥
ततःप्रेतशरीरेपिचिरंतिष्ठत्वियंगता॥ऊर्द्ध्वंयोनित्रयंचैषाभुनक्तुस्वकुशुभकारिणी॥२५॥साहंपं
चशतान्दानिप्रेतदेहस्थिताकिल॥क्षुत्तृड्भ्यांपीडितात्यर्थंदुःखितास्वेनकर्मणा॥२६॥ततःक्षुत्पी
डिताविप्रशरीरंवणिजस्त्विह॥आयातादक्षिणंदेशंकृष्णवेण्यास्तुसंगमं॥२७॥तत्तीरसंश्रितायर्वि
तावत्तस्यशरीरतः॥शिवविष्णुगणैःदूरमपाकृष्टावलादहं॥२८॥योनित्रयादुग्रभवादस्माच्चप्रेतदे
हतः॥ततोक्षुत्क्षामयादृष्टोमयाहित्वंद्विजोत्तम॥२९॥त्वद्धस्ततुलसीवारिसंसर्गाहतपापया॥तत्कृ
पांकुरुविप्रेन्द्रकथंमुक्ताभवाम्यहं॥३०॥इत्थंनिशम्यकलहावचनंद्विजाग्र्यस्तत्कर्मकालभवविस्
स्मयदुःखयुक्तः॥तत्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वाचिरंसवचनंनिजगाददुःखात्॥३१॥

हि ३



इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येकलहोपाख्यानेएकोनविंशतितमोध्यायः॥१९॥धर्मदत्तउवाच॥विलयं
यांतिपापानितीर्थदानव्रतादिभिः॥प्रेतदेहस्थितायास्तेतेषुनैवाधिकारिता॥त्वद्ग्लानिदर्शनाद्स्माद्वि
न्नंचममानसं॥नैवनिर्वृतिमायातित्वामनुद्धृत्यदुःखितां॥२॥पातकंचत्वयात्युग्रंयद्योनित्रयपाकदं॥
नैवान्यैःक्षीयतेपुण्यैःप्रेतत्वंचातिदारुणं॥३॥तस्माद्याजन्मजनितंयन्मयाकार्त्तिकव्रतं॥तत्पुण्य
स्यार्द्धभागेनपरांगतिमवाप्नुहि॥४॥कार्त्तिकव्रतपुण्येननत्समान्यंपातिसर्वथा॥यज्ञदानानितीर्थानि
व्रतान्यपिपतोध्रुवं॥५॥नारदउवाच॥इत्युक्त्वाधर्मदत्तोसौयावत्तामभ्यषेचयत्॥तुलसीमिश्र
तोयेनश्रावयन्द्वादशाक्षरं॥६॥तावत्प्रेतत्वनिर्मुक्ताज्वलदग्निशिखोपमा॥दिव्यरूपधराजाता
लावण्येनयथेंदिरा॥७॥ततःसादंडवद्भूमौप्रणनामाथतंद्विज॥उवाचवचनंहर्षात्गद्गदाक्षरभाषि
णी॥८॥कलहोवाच॥त्वत्प्रसादाद्द्विजश्रेष्ठविमुक्तानिरयादहं॥पापाब्धौमज्जमानानांत्वंनौभू
तोद्यवैध्रुवं॥नारदउवाच॥इत्थंसावदतीविप्रंददर्शायातमंबरात्॥विमानंभास्वरंयुक्तंविष्णुरूपध

Indira Gandhi National
Centre for the Arts

मे

३३ रैगर्दौः॥१०॥पुण्यशीलसुशीलाभ्यामब्जसेजनसेवितं॥तद्विमानंतदापश्यन्धर्मदत्तःसविस्मयः॥११॥
पपातदंडवद्भूमौदृष्ट्वातौविष्णुरूपिणौ॥पुण्यशीलसुशीलौचनत्वातंप्रणतंद्विजं॥१२॥नम
म्यनंदयन्वाक्यमूचतुर्हर्षसंहितं॥गणावूचतुः॥साधुसाधुद्विजश्रेष्ठयस्त्वंविष्णुरतःसदा॥१३॥
दीनानुकंपीधर्मज्ञोविष्णुव्रतपरायणः॥आबाल्यात्त्वाछुभंह्येतद्यत्त्वयाकार्त्तिकव्रतं॥१४॥कृतं
तस्यार्द्धदानेनपुण्यंद्वैगुण्यमागतं॥त्वत्पुण्यस्यार्द्धभागेनयदस्याःपूर्वसंचितं॥१५॥जन्मांतर
शतोद्भूतंपापंतद्विलयंगतं॥स्नानैरेवगतंपापंयदस्याःपूर्वकर्मजं॥१६॥हरिजागरणाद्यैस्त
विमानमिदमास्थिता॥वैकुंठंनीयतेसाधोनानाभोगपुतान्वितं॥१७॥दीपदानभवैःपुण्यै
स्तेजस्वंवपुरास्थिता॥तुलसीपूजनाद्यैस्तुकार्त्तिकव्रतकैःशुभैः॥१८॥विष्णुसान्निध्यगाजाता
त्वत्त्वयादत्तोकृपालुना॥त्वमप्यस्यभवस्यांतेभार्याभ्यांसहयास्यसि॥१९॥वैकुंठभवनंविष्णोः
सान्निध्यंत्वसरूपतां॥तेधन्याःकृतपुण्यास्तेतेषांचसफलोभवः॥२०॥यैर्भक्त्याराधितोविष्णुःकिं ३३

नयच्छतिदेहिनां॥ऐत्तानचरणिर्येनध्रुवत्वेस्थापितःपुनः॥यन्नामस्मरणाद्देवदेहिनोयांतिसद्गतिं॥
ग्रहग्रहीतोनागेंद्रोयन्नामस्मरणात्पुरा॥२२॥विमुक्तःसंनिधिप्राप्तोजातोपंजयसंज्ञकः॥यतस्त्व
यार्चितोविष्णुस्तत्सान्निध्यंप्रयास्यसि॥२३॥वर्षान्ययुतसहस्राणिभार्याद्वयपुतस्यते॥ततःपुण्य
क्षयेजातेयदायास्यतिभूतले॥२४॥सूर्यवंशोद्भवोराजाविख्यातस्त्वंभविष्यति॥नाम्नादशरथ
स्तत्रभार्याद्वयपुतःपुनः॥२५॥तृतीययानयाचापियातेपुरार्द्धभागिनी॥तत्रापितवसान्निध्यं
विष्णुर्यास्यतिभूतले॥२६॥आत्मानंतवपुत्रत्वेप्रकल्पामरकार्यकृत्॥नयज्ञानव्रतानिनती
र्थान्यधिकानिवै॥२७॥धन्योसिविप्रयस्मात्त्वयैतद्व्रतंकृतंप्रीतिकरंजगद्गुरोः॥यस्यार्द्धभागा
द्धफलंमुरारेःप्राणीयतेस्माभिरियंसलोकतां॥२८॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येविं
शोध्यायः॥२०॥नारदउवाच॥इत्यंतद्वचनंश्रुत्वाधर्मदत्तःसविस्मयः॥प्रणम्यदंडवद्भूमौ

Indira Gandhi National Centre for the Arts

वाक्यं चेदमुवाच ह ॥१॥ धर्मदत्त उवाच ॥ आराधयंतः सर्वेपि विष्णुमत्यार्तिनाशनं ॥ यशोदानैर्व्रतैस्तीर्थैस्त
पोभिश्च यथाविधि ॥२॥ विष्णुप्रीतिकरं तेषां किंचित्संनिध्यकारकं ॥ यत्कृत्वा तानि चीर्णानि सर्वा
ण्यपि भवंति हि ॥३॥ गणा ऊचतुः ॥ साधु पृष्टं त्वया विप्र शृणुध्वैकाग्रमानसः ॥ सेतिहासं पुरावृ
त्तं कथ्यमानं पुरा भवं ॥४॥ कांचीपुर्यां चोलनृपश्चक्रवर्ती नृपो भवत् ॥ तस्याभ्येनये देशाश्चोला इति
प्रथां गताः ॥५॥ यस्मिन्वति भूचक्रे दरिद्रो वापि दुःखितः ॥ पापबुद्धिरनाचारो नैव कश्चिद्बभून्नरः ॥६॥
तस्याप्यनंत यज्ञस्य ताम्रपर्णीतटावुभौ ॥ सुवर्णयूपैः शोभाढ्यैरास्तां चैत्ररथोपमैः ॥७॥ स कदा
चिद्गतो राजा अनंतशयनं द्विजः ॥ यत्रास्ते जगतां नाथो योगनिद्रामुपाश्रितः ॥ तत्र श्रीरमणं दे
वं संपूज्य विधिवन्नृपः ॥ मणिमुक्ताफलैर्दिव्यैः सुवर्णपुष्पैश्च शोभितैः ॥९॥ प्रणम्य दंडवद्याव
दुपविष्टः स तत्र वै ॥ तं व ब्राह्मणमायांतमपश्यद्देवसन्निधौ ॥१०॥ देवार्चनार्थमायांतं तुलस्युदक ३४

पाणिनं स्वपुरावासिनं तत्र विष्णुदासाह्वयं द्विजं ॥११॥ तत्राभ्येत्य स विप्रर्षिर्देवदेवमपूजयत् ॥ विष्णुसूक्तेन सु
स्नाप्य तुलसीमंजरीदलैः ॥१२॥ तुलसीपूजया तस्य रत्नपूजा पराहता ॥ आच्छादितां समालोक्य रा
जा क्रुद्धोब्रवीदिदं ॥१३॥ राजोवाच ॥ मणिमाणिक्यस्वर्णपूजा मे शोभाढ्या तु मया कृता ॥ विष्णुदा
स कथं पत्वमाच्छन्ना तुलसीदलैः ॥१४॥ विष्णुभक्तिं न जानासि वराकोसि मतो मम ॥ यस्त्विमामति
शोभाढ्यां पूजां माच्छादयस्पहो ॥१५॥ इति तस्य वचः श्रुत्वा स क्रोधो द्विजसत्तमः ॥ राजगौरवमुल्लं
घ्य जगाद वचनं तदा ॥१६॥ विष्णुदास उवाच ॥ राजन्भक्तिं न जानासि गर्वितोसि नृपश्रिया ॥ किं यद्व्र
प१४ तं त्वं चीर्णं तथा पूर्वं वदस्व तत् ॥ गणावूचतुः ॥ तद्ब्राह्मणवचः श्रुत्वा प्रहस्य स नृपोत्तमः ॥ विष्णुदासं त
दा गर्वाद्व्यंग्यवचनं द्विज ॥१८॥ राजोवाच ॥ इत्थं चेद्वदसि विप्र विष्णुभक्त्यातिगर्वितः ॥ भक्तिस्ते की
पती विष्णोर्दरिद्रस्याधनस्य च ॥१९॥ यज्ञदानादिकं नैव विष्णोस्तुष्टिकरं कृतं ॥ नापि देवालये पू
जा कृता विप्र त्वया क्वचित् ॥२०॥ ईदृशस्यापि ते गर्व एष तिष्ठति भक्तितः ॥ तच्छृण्वं तु वचो मे द्वि



Indira Gandhi National Centre for the Arts

३५ तत्राप्येते द्विजोत्तमाः॥२१॥ साक्षात्कारमहं विष्णोरेष विष्णो वा हि गमिष्यति॥ पश्यंतु सर्वे पितरो भक्ति
ज्ञास्यंति चाव्ययाः॥२२॥ गणावूचतुः॥ इत्युक्त्वा सन्नयोगस्थलि जराजगर्हं द्विज॥ आरंभद्वेष्मवंस
त्रं कृत्वाचार्यफलं॥२३॥ स ऋषिसंघसमाजुष्टं बहुन्नं बहुदक्षिणं॥ यद् द्वलकृतं पूर्वं गयाक्षेत्रे
समद्विमत्॥२४॥ विष्णुदासोपि तत्रैव तस्योद्वालयव्रती॥ यथोक्तनियमं कुर्वन्स्वविष्णुतुष्टिक
रान्सदा॥२५॥ माघोर्ज्जयोर्व्रतं सम्यक् तुलसीवनपालनं॥ एकादशीव्रतं जाप्यं द्वादशाक्षरविद्यया॥२६॥
उपचारैः षोडशभिरुपचाराद्भिमंगलैः॥ नित्यं विष्णोस्तथा पूजा व्रतान्येतानि सोऽकरोत्॥२७॥ नि
त्यं संस्मरन्विष्णुं गच्छन्भुंजन्स्वपन्नपि॥ सर्वभूतस्थितं विष्णुमपश्यत्सर्वदर्शनः॥२८॥ माघका
र्त्तिकयोर्नित्यं विशेषनियमानपि॥ अकरोद्विष्णुतुष्ट्यर्थं सोद्यापनविधिं तदा॥२९॥ एवंस
माराधयतो श्रियःपतिं तपोस्तचोलेश्वरविष्णुदासयोः॥ आगाच्च कालो बहुतस्ययोस्तयोस्तन्निष्ठ
सर्वेंद्रिकर्मणोस्तदा॥३०॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये चोलनृपसंवादे नामैकविंशो ३५
य

वि ता

ध्यायः॥२१॥ नारद उवाच॥ कदाचिद्विष्णुदासोथ कृत्वा नित्यविधिं द्विज॥ स्वपाकमकरो वद्धरत्कोप्य
लक्षितः॥१॥ तमाहर्तुमपि पाकं तु पुनर्नैवाकरोत्तदा॥ सायंकालार्चनस्यासौ व्रतभंगभयाद्द्विजः॥२॥ द्वि
२ त तीयेह्नि ततः पाकं कृत्वा यावत्स विष्णवे॥ उपहारार्पणीकर्तुं गतः कोप्यहरत्पुनः॥३॥ एवं सप्तदिनं
तस्य पाकं कोप्यहरन्नृप॥ ततस्स विस्मयं सोपमनस्येवावधारयत्॥४॥ अहो नित्यं समभ्येत्य कः पा
कं हरते मम॥ क्षेत्रसंन्यासिनः स्वक्तुमन्याय्यं मम सर्वथा॥५॥ पुनः पाकं विधायात्र भुज्यते यदि वत्
चेन्मया॥ सायंकालार्चनं चैतत्परित्याज्यं कथं भवेत्॥६॥ यदि पाकं विधायैव भोक्तव्यं तु मया
न तत्॥ अनिवेद्य मया सर्वं विष्णवे नैव भुज्यते॥७॥ उपोषितोहं सप्ताहं तिष्ठाम्यत्र गतेस्थितः॥
अद्य संरक्षणं सम्यक् पाकस्यात्र करोम्यहं॥ इति पाकं विधायासौ तत्रैवालक्षितः स्थितः॥ तावद्द
दर्शचांडालं पाकान्नेहरतो स्थितं॥९॥ क्षुत्क्षामं दीनवचनं मस्थिचर्मावशेषितं॥ तमालोक्य

Indira Gandhi National
Centre for the Arts

द्विजाग्र्यो भक्तस्तथा । इत्युन्नमानसः ॥ विलोक्यान्तरं विप्रस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ कथमत्रस्थित्विदं दृ
ष्टं घृतमेव हरामि भो ॥ ११ ॥ इत्थं वदंतं विप्रात्र्यमायांतं स विलोक्य च ॥ वेगाद्धावद्दीत्पासः मूर्छित
श्चापपात ह ॥ भीमं संमूर्छितं दृष्ट्वा चांडालं स द्विजाग्रणीः ॥ वेदभ्यस्य कृपयाप्लवस्त्रांतैरवीजयत् ॥ १३ ॥
अथोत्थितं तमेवासौ विष्णुरूपमलोकयत् ॥ साक्षान्नारायणं देवं शंखचक्रगदाधरं ॥ १४ ॥ पीतां
बरं चतुर्बाहुं श्रीवत्सांककिरीटिनं ॥ अतसीपुष्पसंकाशं कौस्तुभोरस्थलं विभुं ॥ १५ ॥ तं दृष्ट्वा सा
त्विकैर्भावैराकृतो द्विजसत्तमः ॥ स्तोतुं चैव नमस्कर्तुं तदा नालं बभूव सः ॥ १६ ॥ अथ शक्रादयो दे
वास्तथैवाजियपुसनदा ॥ गंधर्वाप्सरसश्चैव जगुश्च ननृतुस्तथा ॥ विप्रांश तत्संकीर्णं देवर्षिगणसेवि
तं ॥ गीतवादित्रनिर्घोषं स्यानंतह नवतदा ॥ १८ ॥ विमानवरसंस्थं तं गच्छंतं विष्णुसन्निधिं ॥ दीक्षि
तश्चोलनृपतिर्विष्णुदासं ददर्श सः ॥ २० ॥ ततो विष्णुः समालिंग्य स्वभक्तं सात्विकावृतं ॥ सारूप्यमा ३६
न

त्मनो दत्वा न ययौ वैकुंठमंदिरं ॥ १९ ॥ वैकुंठभवनं यातं विष्णुदासं विलोक्य सः ॥ स्वगुरुं मुद्गलं वेगादाहूयेत्थं
व चोऽब्रवीत् ॥ २१ ॥ राजोवाच ॥ यत्स्पर्धया मया चैतद्यज्ञदानादिका क्रिया ॥ स विष्णुरूपधृक् वि
प्रो याति वैकुंठमंदिरं ॥ दीक्षितेन मया सम्यक् सत्रेस्मिन्वैष्णवे त्वया ॥ कृतमग्नौ हुता विप्रा रत्नाद्यैर्
र्णिमानसाः ॥ २३ ॥ न सोऽद्यापि समे देव प्रसन्नो जायते ध्रुवं ॥ भक्त्यैव तस्य विप्रस्य साक्षात्कारं ददौ
हरिः ॥ २४ ॥ तस्माद्दानैश्च यज्ञैश्च नैव विष्णुः प्रसीदति ॥ भक्तिरेव परं तस्य निदानं दर्शने विभोः ॥ २५ ॥
इत्युक्त्वा भागिनेयं स्वमभिषिच्य नृपासने ॥ आबाल्याद्दीक्षितो यत्नेऽप्युत्तमगाध तः ॥ २६ ॥
स्वस्त्रीयाऽऽत्व जापते तद्व्रतीवाध्ववर्तिनः ॥ २७ ॥ यज्ञवा
तस्माद्यापितदेशो सहराज्यांशभागिनः ॥ त्रिरुच्चैर्व्याजहाराशु विष्णुसंबोधयंस्तदा ॥ २८ ॥ विष्णोर्नति
ष्ठ नतो भ्येत्यवाह्यकुंडाग्रतः स्थितः ॥ इत्युक्त्वासोपतद्वह्नौ सर्वेषामेव पश्यतां ॥ २९ ॥ मुद्गलस्तु तदा
स्थिरां देहि मनोवाक्कायकर्मणा ॥ इत्युक्त्वासोपतद्वह्नौ

३८

क्रोधाच्छिखुच्छाखाभुत्या टपत्स्वकां॥ ततस्तु घापितश्रोत्रे मुकलादि विशिखाबभुः॥३०॥ तावत्सविनवद्धि
सुकुंडाग्नेभ क्रीवत्सलः॥ तमालिंग्य विमानाग्र्ये समारोह्य दच्युतः॥३१॥ समालिंग्याल साद्रूप्यं
दत्वा वैकुंठमंदिरं॥ ते नैव सह देवेशो जगाम त्रिदशैर्वृतः॥३२॥ नारद उवाच॥ यो विष्णुदासः
सतु पुण्यशीलो यश्चोलभूपः स सुशीलनामा॥ आवां मुनौ तत्समरूपभाजौ दास्यौ कृतौ ते
न रमाप्रियेण॥३३॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये द्वाविंशोध्यायः॥२२॥ धर्मदत्त उवाच॥
जयश्च विजयश्चैव विष्णोर्द्वास्थौ पुराश्रुतौ॥ किंतु ताभ्यां पुराचीर्णं यस्मात्तद्रूपधारिणौ॥१॥ ग
णावूचतुः॥ तृणविंदोस्तु कन्यायां देवहूत्यां पुरा द्विजः॥ कर्दमस्य तु दृष्टेश्च पुत्रौ द्वौ संबभूवतुः॥ ज्ये
ष्ठो जयः कनिष्ठो भूद्विजयश्चेति नामतः॥ तस्यामेवाभवत्पश्चात्कपिलो योगधर्मवित्॥३॥
जयश्च विजयश्चैव विष्णुभक्तिरतौ सदा॥ तौ तन्निष्ठं ड्रिपग्रामो धर्मशीलौ बभूवतुः॥ नित्यम ३८

ष्टाक्षरीजाप्यौ विष्णुव्रतकरावुभौ॥ साक्षात्कारं हरेर्विष्णुस्तयोर्नित्यार्चने सदा॥५॥ मरुत्तेन कदाचित्तावाहू
तौ यज्ञकर्मणि॥ जग्मतुर्यज्ञकुशलौ देवर्षिगणपूजितौ॥६॥ जयस्तत्राभवद्ब्रह्मा विजयो याजको भव
त्॥ ततो यज्ञविधिं कृत्वा तत्र परिपूर्णे प्रचक्रतुः॥७॥ मरुत्तो वभृथस्नातस्ताभ्यां वित्तं ददौ बहु॥
तत्समादाय तौ वित्तं जग्मतुः स्वस्वाश्रमं प्रति॥८॥ यज्ञार्थं तद्धनं विभो तुल्यार्थं तदा मुनी॥ तद्धनं विभजं
तौ तौ पस्पर्द्धाते परस्परं॥९॥ जयोब्रवीत्समो भागः क्रियतामिति तत्र सः॥ विजयश्चैव यद्येन लब्धं ध्वंत
तस्य तद्भवेत्॥१०॥ ततोशाप जयः क्रोधाद्विजयं क्षुब्धमानसः॥ गृहीत्वा न ददास्येतत् तस्मात्ग्राहो भवे
ति मां॥११॥ विजयस्तस्य तच्छापं श्रुत्वासौ प्यशपद्रुतं॥ मदमात्तोशपस्त्वं मां तस्मान्मातंगतां व्रज॥१२॥
ततस्तच्छापवश्यतु विष्णोर्दृष्ट्वा नित्यार्चने विभुं॥ शापयोश्च निवृत्तिं तौ यपाच्यातेरमापतिं॥१३॥ जयविजया
वूचतुः॥ भक्तावावां कथं देव याह मातंगयोनिगौ॥ भविष्याव कपासिंधो तच्छापौ विनिवर्त्यतां॥१४॥
श्रीभगवानुवाच॥ मद्भक्तयोर्वचो सत्यं न कदाचिद्भविष्यति॥ यथापि नान्यथा कर्तुं शक्यते तत्क

Indira Gandhi National Centre for the Arts

३८ वीक्षणे ॥१५॥ प्रह्लादवचसा स्तंभे ह्याविर्भूतो ह्यहं पुरा ॥ तथांबरीषवाक्येन जातो गर्भे ह्यहं किल ॥१६॥
तस्माद्युवामिमौ शापावनुभूय स्वयंकृतौ ॥ तमेतां मत्पदं नित्यं मित्युक्त्वान्तर्दधे हरिः ॥१७॥ गणावु
चतुः ॥ ततस्तौ ग्राहमातंगौ बभूवतुर्गंडकीतटे ॥ जातिस्मरौ तु तद्योन्यामपि विष्णुव्रते स्थितौ ॥ कस्मि
न्नेकदा गजराजः स्नातुं कार्तिके गंडकीगतः ॥ तावज्जग्राह तं ग्राहः सस्मरन्स्वापकारणं ॥१९॥
ग्राहगृहीतोसौ नागः सस्मार श्रीपतिं तदा ॥ तावदाविर्भवद्विष्णुः शंखचक्रगदाधरः ॥२०॥ ततस्तौ
ग्राहमातंगौ चक्रांक्षि त्वासमुद्धृतौ ॥ दत्वा च निजसारूप्यं वैकुंठमनयद्विभुः ॥२१॥ तदाप्रभृति तत्स्था
नं हरिक्षेत्रमिति स्मृतं ॥ चक्रसंघर्षणाद्यस्मिन्ग्रावाणोपि हि लांछिता ॥२२॥ तावुभौ विश्रुतौ
लोके जयश्च विजयस्तथा ॥ नित्यं विष्णुप्रियौ द्वास्थौ पृष्टो यो हि त्वया द्विज ॥२३॥ अस्त्वमपि धर्म
रा नित्यं विष्णुव्रते स्थितः ॥ त्यक्त्वा सर्वपरीवादमपि भव स्वसमदर्शनिः ॥२४॥ तुलामकरमेषेषु प्रा
तः स्नायी सदा भव ॥ एकादशीव्रतनिष्ठ तुलसीवनपालकः ॥२५॥ ब्राह्मणान्पगाश्चापि वैष्ण ३८

वांश्च सदा भद्र ॥ मसूरिकामारनालं [illegible] नपिवेत्सदा ॥२६॥ एवं त्वमपि देहांते तद्विष्णोः परमं पदं ॥ प्राप्नो
षि धर्मदत्त त्वं तत्रैव यथावयं ॥२७॥ यावज्जन्मव्रतादस्माद्विष्णुसंतुष्टिकारकात् ॥ न यज्ञा न च दाना
नि न तीर्थान्यधिकानि वै ॥२८॥ धन्योसि विप्र यस्य त्वं [illegible] कृतं तुष्टिकरं जगद्गुरोः ॥ यद्ध
र्मभागादस्फलं मुमुक्षुः प्राप्यते स्माभिरिप्यं सलोकता ॥२९॥ नारद उवाच ॥ इत्युक्तौ धर्मदत्तं तमुप
दिश्य विमानगौ ॥ तया कलहया सार्द्धं वैकुंठभवनं गतौ ॥३०॥ धर्मदत्तोप्यसौ जातः स्वप्रदत्त व्रते स्थि
तः ॥ देहांते तद्विभोः स्थानं भार्याभ्यामन्वितो भ्ययात् ॥ इतिहासमिमं पुरा भवं शृणुते श्रावय
ते च यः पुमान् ॥ हरिसान्निध्यकारी स्यात् मतिं लभते सम्यग्याजगद्गुरोः ॥३२॥ इति श्रीपद्मपुराणे कार्ति
कमाहात्म्ये गणोपाख्याने त्रयोविंशोध्यायः ॥२३॥ पृथुरुवाच ॥ कलहवैरणाल्लब्धः [illegible] स्माच्छिव [illegible]
विष्णुगणैः पुरा ॥ दारिकशरीरात्कलहानिरस्ता कथिता त्वया ॥१॥ प्रभावोयं तपो नैद्यो किंवाक्षे
त्रेस्य तस्य च ॥ तन्मे कथय धर्मज्ञ विस्मयोत्र महान्मम ॥२॥ नारद उवाच ॥ कृष्णा [illegible] तनुः सा

Indira Gandhi National Centre for the Arts

३९ क्षाद्देणादेवो महेश्वरः॥ तत्संगमप्रभावं तु नालं वक्तुं चतुर्मुखः॥३॥ तथापि तत्समुत्पत्तिं कीर्तयिष्यामि तां श्रृ
णु॥ चाक्षुषस्यांतरे पूर्वं मनोर्देवः पितामहः॥४॥ सह्याद्रिशिखरे रम्ये यजनाय धृतो भवत्॥ सभार्यः स्वाय
त्तसंभारः सर्वदेवगणैर्वृतः॥५॥ पुत्रौ हरिहराभ्यां हि तत्र शिरोशि रक्षयेयो॥ भृग्वादयो मुनिगणा मुहूर्ते
ब्रह्मदैवते॥६॥ तस्य दीक्षाविधानाय समाजग्मुः क्रतुराद्दताः॥ अथ ज्येष्ठां स्वरां पत्नीं माह्वयाश्च
क्रुरी॥७॥ सा शनैरायये तावद्गुर्विष्णुरुवाच ह॥ भृगुरुवाच॥ विलंबः स्वरात्वया हृता प्या
यातिन हि सत्वरं॥८॥ मुहूर्तातिक्रमश्चैव कार्यो दीक्षाविधौ कथं॥ विष्णुरुवाच॥ मायाति चे
त्स्वरा शीघ्रं गायत्र्यत्र विधीयतां॥९॥ एवापि न भवेदस्य भार्या किंतु एप कर्मणि॥ नारद उवाच॥
एवमेवाह रुद्रोपि विष्णोर्वाक्यममन्यत॥१०॥ तच्छ्रुत्वा स भृगुर्वाक्यं गायत्रीं ब्रह्मणः करे॥ निवेश्य
दक्षिणे भागे दीक्षाविधिमकारयत्॥११॥ यावद्दीक्षाविधिं तस्य विधिश्च क्रतुमुनीश्वराः॥ तावि
दध्यापयो तत्र स्वरा स्वस्थलं नय॥१२॥ ततस्तां दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह॥ सा पत्न्ये ३९

र्ष्याभवक्रोधा स्वरा वचनमब्रवीत्॥ स्वरोवाच॥ अपूज्या यत्र पूज्यंते पूज्यपूजाव्यतिक्रमः॥ त्रीणि
तत्र भविष्यंति दुर्भिक्षं मरणं भयं॥१४॥ येयं च दक्षिणे भागे उपविष्टा महासने॥ तस्माल्लोकैः सदा
दृश्या तनुरूपा तु निम्नगा॥१५॥ ममासने कनिष्ठेयं भवद्भिः सन्निवेशिता॥ तस्मात्सर्वे जडीभू
ता नदीरूपा भविष्यथ॥ गायत्र्युवाच॥ तव भर्ता यथा ब्रह्मा ममाप्येष तथा खलु॥ वृथा शपस्त्वं यस्मा
न्मां भव त्वमपि निम्नगा॥१७॥ नारद उवाच॥ ततो हाहाकृतां सर्वे शिवविष्णुमुखाः सुराः॥ प्रणम्य
ऽवद्भूनौ स्वरां तत्र विजर्हणुः॥१८॥ देवा ऊचुः॥ देवि सर्वे वयं सद्यास्त्वयाधुना॥ यदि सर्वे जडीभूता भवि
ष्यामो त्र निम्नगाः॥१९॥ पूर्वामपि सदैवौ च स्वां शापाद्याप पि निम्नगे॥ तदा लोकत्रयं ह्येतत्र विनिष्य शि
तिनिश्चितं॥२०॥ अविवेकः कृतस्तस्मा श्रापो यं विनिवर्त्तताम्॥ स्वरोवाच॥ नार्चिता हि गणाधि
पो यज्ञारंभे तु सुरोत्तमाः॥२१॥ तस्माद्विघ्नं समुत्पन्नं तत्क्रोधजमिदं खलु॥ नापि मद्वचनं ह्येतद
सत्यं खलु जायते॥२२॥ तस्मात्त्वां सैर्जडीभूताः यूयं भवत निम्नगाः॥ सा वामपि सैन्यौ च स्वां

ष

Indira Gandhi National
Centre for the Arts

शाभ्यामपि निम्नगे ॥२३॥ भविष्यावोत्र भो देवाः पश्चिमाभिमुखावहाः ॥ नारद उवाच ॥ इति तद्वचनं श्रुत्वा
ब्रह्मविष्णुमहेश्वराः ॥२४॥ जडीभूता भवन्नद्यः स्वांशेरेव तदान्नृप ॥ तत्र विष्णुरभूत्कृष्णा वर्णा देवो म
हेश्वरः ॥२५॥ ब्रह्मा ककुद्मती चापि दृग्योगेवाभवन्नृप ॥ देवास्तानपि मानं ज्ञात्वा जडीभूतान्विचि
क्षिपुः ॥२६॥ सह्याद्रिशिखरेभ्यस्ताः पृथगासंस्तु निम्नगाः ॥ देवांशे पूर्ववाहिन्यो बभूवुः पश्चिमा
वहाः ॥२७॥ तत्पत्न्यंशैः पृथक्तत्र शतशोथ सहस्रशः ॥ गायत्री च स्वरा चैव पश्चिमाभिमुखे तदा ॥२८॥
योगेनैव भवन्नद्यासा वित्रीति पृथग्गता ॥ ब्रह्मणा स्थापितौ तत्र पद्मेह हरिहरावुभौ ॥२९॥ ममावला
तिबलिनौ नाम्ना देवौ बभूवतुः ॥ तयोर्नद्योस्तु माहात्म्यं नाहं वक्तुं क्षमो नृप ॥३०॥ पृथुब्रह्माद्यो
देवाः स्वांशैस्तिष्ठंति निम्नगाः ॥ कृष्णेवं पापहरं शिवं च स्मरणात्तिपः स्नावपतेच मत्त्या ॥ स्यात्त
स्पृशः सकलफलं च तद्दर्शनस्नानगमाद्भवं स्मृतं ॥३१॥ हरिसंनिधिकारिणी मर्त्ये लभते स
त्कृपया जगद्गुरोः ॥३२॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये कृष्णवेण्यामहिम्नवर्णनं नाम चतु



विंशोध्यायः ॥२९॥ श्रीकृष्ण उवाच ॥ इति तद्वचनं श्रुत्वा पृथुर्विस्मितमानसः ॥ संपूज्य नारदं भक्त्या विस
सर्ज तदा प्रिये ॥१॥ तस्मात्तु तत्त्रयं प्रिये तन्ममातीव प्रियंकरं ॥ माघकार्त्तिकयोस्तद्वत्तथैवैकादशी
व्रतं ॥२॥ वनस्पतीनां तुलसी मासानां कार्त्तिकः प्रियः ॥ एकादशी तिथीनां तु क्षेत्राणां द्वारका म
म ॥३॥ एतेषां सेवनं यस्तु करोति नियतेंद्रियः ॥ समेवल्लभतामेति न तथा यजनादिभिः ॥४॥ पा
पेभ्यो न भयं तस्य कर्त्तव्यं नियमादपि ॥ एतेषां सेवनं कांते कुर्वतां नस्त्रसादृतः ॥५॥ सत्यभामोवाच ॥
विस्मापनीयं तल्लाघवं यत्त्वया कथितं मम ॥६॥ परदत्तेन पुण्येन कलहा मुक्तिमागता ॥ इत्थंप्रभावो
मासोयं कार्त्तिकस्ते प्रियंकरः ॥७॥ स्वामिद्रोहादिपापानि स्नानदानैर्गतानि ते ॥ दत्तं चेल्लभ्यते पु
ण्यं यत्परेणाकृतं प्रभो ॥८॥ अदत्तं केन मार्गेण लभ्यते वा न वेति वा ॥ श्रीकृष्ण उवाच ॥ अ
दत्तान्यपि पुण्यानि पापानि च यथा नरैः ॥९॥ प्राप्यंते कर्मणा येन तच्छृण्वन्ति शामय ॥ देशग्राम



Indira Gandhi National
Centre for the Arts

४२ कुलानि स्युर्भोगभांजि कृतानि हि कृतौ तु केवलं कर्त्ता फलं भुक् पुण्यपापयोः ॥ अकृते हि संसर्गे चाव स्य-
यमुदाहृता ॥११॥ संसर्गात् पुण्यपापानि यथा यांति निबोध तत् ॥ एकत्र भोजनाद्यौ नाद्देकपात्रस्य
तु भोजनात् ॥१२॥ फलार्द्धं प्राप्नुयान्मर्त्यो यथावत्पुण्यपापयोः ॥ स्पर्शनादूषणाद्वापि परैस्तवनादपि ॥१३॥ स्य २
दशांशं पुण्यपापानां नित्यं प्राप्नोति मानवः ॥ एकासनादेकपानान्निश्वासस्पागमंगतः ॥१४॥ षडं-
शफलभागी स्यान्नियतं पुण्यपापयोः ॥ दर्शनश्रवणाभ्यां च मनोध्यानात्तथैव च ॥ परस्य पुण्य-
पापानां शतांशं प्राप्नुयान्नरः ॥ परस्य निंदां पैशून्यं धिक्कारं च करोति यः ॥ तत्कृतं पातकं प्राप्य स्वपु-
ण्यं प्रददाति सः ॥ कुर्वतः पुण्यकर्माणि सेवां यः कुरुते नरः ॥१७॥ पत्नीभृत्यकशिष्येभ्यो यद्वन्यो-
पि मानवः ॥ तस्य सेवानुरूपेण तस्य तत्पुण्यभाग्भवेत् ॥१८॥ एकपंक्त्युपभुक्तानां पर्युलंघयेत्त-
दिवेशयन् ॥ तस्य पुण्यषडंशं तु लभेद्यस्तु विलंघितः ॥१९॥ स्नानसंध्यादिकं कुर्वन् यस्य ४१

ड्वा प्रभाषते ॥ सत्कर्म पुण्यषष्ठांशं दद्यात्तस्मै विनिश्चितं ॥२०॥ धर्मोद्देशेन यो द्रव्यं परं याचयते नरः ॥ तत्पुण्य-
जं कर्मजं तस्य धनदस्त्वाप्नुयात्फलं ॥२१॥ अपहृत्य परद्रव्यं पुण्यकर्म करोति यः ॥ कर्मकृत्पापमाप्नो-
ति धनिनस्तद्भवेत्फलं ॥२२॥ नाप्रदत्य स्वऋणं यस्तु परस्य म्रीयते नरः ॥ धनी तत्पुण्यमादत्ते स्वधनस्या-
नुरूपतः ॥२३॥ बुद्धिदस्त्वनुमंता च यश्चोपकरणप्रदः ॥ बलदश्चापि षष्ठांशमाप्नुयात्पुण्यपापयोः ॥२४॥
प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ॥ शिष्याद्गुरुः स्त्रियो भर्त्ता पिता पुत्रात्तथैव च ॥२५॥ स्व-
पतेरपि पुण्यस्य योषिदर्द्धमवाप्नुयात् ॥ चेत्तस्यानुमता शश्वद्वर्त्तते नुचिकारिणी ॥२६॥ परह-
स्तेन दानादि कुर्वतः पुण्यकर्मणः ॥ विना भृतकपुत्राभ्यां कर्त्ता षष्ठांशमुद्धरेत् ॥२७॥ वृत्तिदो वृ-
त्तिभोक्तुः पुण्यषष्ठांशमुद्धरेत् ॥ आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥२८॥ श्रीकृष्ण
उवाच ॥ इत्थं ह्यदत्तान्यपि पुण्यपापान्यायांति नित्यं परसंचितानि ॥ भवत्स्ववाग्मिन्निति हा
समग्रपुराभवं पुण्यमतिप्रदं च ॥२९॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये पुण्यपापप्राप्तिकथनं श्रा

Indira Gandhi National Centre for the Arts

४२ नाम पंचविंशतितमो ध्यायः ॥२५॥ श्रीकृष्ण उवाच ॥ पुरावंतीपुरे वासी विप्र आसीद्धनेश्वरः ॥ विप्रकर्मप
रिभ्रष्टः पापनिष्ठः सुदुर्मतिः ॥१॥ रसकंबलचर्माद्यैः तस्य व्यापारवृत्तिकः ॥ वेश्यागमनशीलश्च सुरापान
धूतेनातत्परमानसः ॥२॥ देशाद्देशांतरं गच्छन् सैरसविक्रयकारणात् ॥ माहिष्मतीपुरीमागात्क
दाचित्स धनेश्वरः ॥३॥ महिषेण कृता पूर्वं तस्मान्माहिष्मती तु सा ॥ यस्या वप्रगता भाति नर्मदा पा
पनाशिनी ॥४॥ कार्त्तिकव्रतिनस्तत्र नानाग्रामांतरागतान् ॥ स दृष्ट्वा विक्रयं कुर्वन् मासमेकमु
वास ह ॥५॥ स नित्यं नर्मदातीरे भ्रमन्विक्रयकर्मणा ॥ ददर्श ब्राह्मणांस्तान्सः यत्र देवार्चनर
तान् ॥६॥ कांश्चित्पुराणपठतः कांश्चित्तद्ध्यवणे रतान् ॥ नृत्यगायनवादित्र विष्णुस्तवन
तत्परान् ॥७॥ विष्णुमुद्रांकितान् कांश्चिन्मालातुलसीधारिणः ॥ ददर्श कौतुकाविष्टो हि
सतत्र धनेश्वरः ॥८॥ नित्यं परिभ्रमंस्तत्र दर्शनस्पर्शभाषणात् ॥ वैष्णवानां तथा विष्णोर्ना
मसंश्रावितो भवत् ॥९॥ एवं मासस्थितः सोऽथ कार्त्तिकोद्यापने विधिं ॥ जिष्णोर्दर्शितोऽसौ न्मले: ४२

जागरणं हरेः ॥१०॥ पूर्णिमास्यां ततो पश्यद्विप्रगोभूजनादिकं ॥ दक्षिणाभोजनाद्यं च दीपमानं व्रत
स्थितैः ॥११॥ ततोऽस्तमये चैव दीपोत्सर्गविधिं तदा ॥ क्रियमाणं ददर्शासौ प्रीत्यर्थं त्रिपुरद्विषः ॥१२॥
त्रिपुराणां कृतो दाहो यतस्तस्यां शिवेन तु ॥ स तस्मात्पौर्णिमायां तु तिथौ भक्तैर्महोत्सवः ॥१३॥ मम
रुद्रस्य यः कश्चिद् अंतरं परिकल्पयेत् ॥ तस्य पुण्यक्रिया सर्वा निःफलाः स्युर्न संशयः ॥१४॥ तत्र
वर्त्यादिकं पश्यन् बभ्राम स धनेश्वरः ॥ तावत् कृष्णाहिना दष्टो विह्वलः स पपात ह ॥१५॥ ज
नास्तं पतितं वीक्ष्य परिवव्रुः कृपान्विताः ॥ तुलसीमिश्रितैस्तोयैः स्तन्मुखं सिषिचुस्तदा ॥१६॥ अथ दे
हं परित्यक्तं तं बद्ध्वा यमकिंकराः ॥ वध्यमानं कशाघातैर्निन्युः संयमनीं रुषा ॥१७॥ चित्रगुप्तस्तु तं
दृष्ट्वा निर्भर्त्स्याथ वदत्तदा ॥ अनेनाबाल्यतः कर्म यद्दुःकृतं कृतं ॥१८॥ चित्रगुप्त उवाच ॥ नैवा
स्ति दृश्यते किंचिद् बाल्यात्सुकृतं कृतं ॥ दुःकृतं शक्यते वक्तुं वर्षैरपि न भास्करे ॥१९॥ पापमूर्ति
रयं दुष्टः केवलं दृश्यते विभो ॥ तस्मादाकल्पमर्यादं निरये पच्यतां ॥२०॥ श्रीकृष्ण उवाच ॥ निशम्ये



Indira Gandhi National Centre for the Arts

४३ त्वंचंचः क्रोधाद्यमः प्राह स्वकिंकरान् ॥ यम उवाच ॥ नोऽग्रेतपपस्त्वेनं बध्वानं स्वकिंकरैः ॥ कुंभीपाके क्षि-
पेत्वाशु दुःखं कल्पक्षयदर्शनं ॥२२॥ श्रीकृष्ण उवाच ॥ ततो मुद्गरनिर्भिन्नमूर्द्धानं प्रेतपो नयत् ॥ कुंभी-
पाके क्षिपद्यावत्तु तैलक्वथनशब्दिते ॥२३॥ यावत्क्षिप्तः स तत्रासौ तावच्छीतलतां ययौ ॥ कुंभीपाको
यथा वह्निः प्रह्लादक्षेपणे पुरा ॥२४॥ तद्दृष्ट्वा महाश्चर्यं प्रेतपो विस्मयान्वितः ॥ वेगादाग-
त्य तत्सर्वं यमाय कथयत्तदा ॥२५॥ तावदभ्यागतस्तत्र नारदः प्राह सत्वरं ॥ यमेन पूजितः सम्य-
क् ॥ तं दृष्ट्वा वाक्यमब्रवीत् ॥२६॥ नारद उवाच ॥ नैवायं निरयान्भोक्तुं क्षमः स वित्तमर्दनो ॥ यमा
द्ग तेऽस्य संजातं कर्मयन्निरयापहं ॥२७॥ यः पुण्यकर्मणां कुर्याद्दर्शनस्पर्शभाषणं ॥ तत्षड्भागमवाप्नो-
ति पुण्यस्यानियतं सदा ॥२८॥ असंख्याते तु संसर्गे कृतवानेष यद्दूरे ॥ कार्त्तिकव्रतिभिर्मासं त-
स्मात्पुण्यांशभागयं ॥२९॥ यदीकरस्तेषां संपूर्णव्रतपुण्यभाक् ॥ अतोऽस्योर्जव्रतोद्भूतपुण्य-
संख्या न विद्यते ॥३०॥ कार्त्तिकव्रतिनां पुंसां पातकानि महान्ति च ॥ नाशयत्येव सर्वात्मा विष्णु- ४३

स्तद्भक्तवत्सलः ॥३१॥ अंते च नार्मदे स्नातो ये स्तुलसीमिश्रिते स्वयं ॥ वैष्णवैः स्नापितो विष्णोर्नामसंश्रावितो-
पि च ॥३२॥ तस्मादिहत्तपापोऽयं सउत्तिष्ठामुमर्हसि ॥ वैष्णवानुगृहीतोऽसौ निरये नैव पच्यतो ॥३३॥
आदर्शष्वेकैर्यथा पापैर्निरये भोगसन्निधिः ॥ प्राप्यते सुकृतैस्तद्वत्स्वर्गसंनिहितिस्तथा ॥३४॥
तस्मादेकाम पुण्यो ह्येष यथोनिस्थितो भवेत् ॥ विलोक्य निरयान्सर्वान्पापभोगप्रदायकान् ॥३५॥
श्रीकृष्ण उवाच ॥ इत्युक्तागतवतिनारदे यथ सोरीतवाक्यमाव विबुद्धतत्सुकर्मा ॥ तं विप्रं पुनर-
नयत्स्व किंकरेण तान्सर्वान्निरयगणान्प्रदर्शयिष्यन् ॥३६॥ इति श्रीपद्मपुराणे कार्त्तिक-
माहात्म्ये धनेश्वरोपाख्याने षड्विंशोऽध्यायः ॥२६॥ श्रीकृष्ण उवाच ॥ ततो धनेश्वरं नीत्वा निरया-
न्प्रेतपोऽब्रवीत् ॥ प्रदर्शयिष्यन्स्तान्सर्वान्यमानुज्ञाकरस्तदा ॥१॥ प्रेत उवाच ॥ पश्येमान्निरयां-
श्घोरान् धनेश्वर महाभयान् ॥ येषु पापकरा नित्यं पच्यंते यमकिंकरैः ॥२॥ तप्तवालुकनामा-
यं निरयो घोरदर्शनः ॥ यस्मिन्नेते दग्धदेहाः क्रंदंते पापकारिणः ॥३॥ अतिथीन्वैश्वदेवांते

Indira Gandhi National
Centre for the Arts

४४ श्वस्वकामानागतोऽथवा ॥ पूजयंती नरास्तेहि पच्यंते स्वेन कर्मणा ॥४॥ गुर्वग्निब्राह्मणान्गाश्च दृष्ट्वा मूर्द्धा-
भिषेचकान् ॥ ताडयंति पदा ये वै ते निर्दग्धा ग्रपत्स्वपी ॥५॥ बहुदुःखवहनिरयो नानापापे प्रप-
द्यते ॥ तथैवांधतमिस्राख्यं द्वितीयो निरयो महान् ॥६॥ पशुपक्षीमुखैर्दंतैर्भिद्यते पापकर्मणः ॥ अं-
मिघोरवक्रैश्च अनेकैश्च निरंतरं ॥७॥ असावपि स्थितः घोरो ध्वांक्षकाकमृगपक्षिभिः ॥ पुरुमर्मभि-
दो मर्त्याः पच्यंते येषु पापिनः ॥८॥ तृतीयः क्रकचो घोरो यत्र निरयो घोरदर्शनः ॥ यत्रेमे क्रकचैर्मर्त्याः
पच्यंते पापकर्मिणः ॥९॥ असिपत्रवनो घोरश्च बहुप्रकारैः पर्यवस्थितः ॥ पतिपुत्रादिभिर्ये वै वि-
योगं प्रापयंति हि ॥१०॥ रिष्ठैः स्वैरैर विपरान् पच्यंते तत्र मे नराः ॥ असिपत्रैश्छिद्यमानाश्छिन्नीत्वाप-
त्रापिता ॥११॥ पच्यंते पापिनस्तस्मिन् क्रंदमानास्ततस्ततः ॥ अग्नौलाख्यो महाघोरश्चतुर्थो निर-
योयं ॥१२॥ पशुपनानाविधैः पापैः रावध्य यमसिंकिंकरैः ॥१४॥ असावपि हि बहुधा बंध बं-
धादिभिः स्थितः ॥ कूटशाल्मलिनामायं निरयः पंचमः ॥१५॥ यत्रांगारनिभापेत्तेशा ४४

ल्मला यास्थिता द्विज ॥ यत्रैषो हाविपच्यंते यातनाभिरिमे न राः ॥१६॥ परदारपरद्रव्यपरद्रोहरतास्स-
दा ॥ रक्त. यमिमं पश्य षष्ठं निरयमद्भुतं ॥१७॥ अधोमुखा विपच्यंते यत्र पापकृता नराः ॥ अभक्ष्य-
भक्षकानिंद्यपेयस्यादिरताश्च ये ॥१८॥ मज्जमाना वाध्यमानाः क्रंदंते भैरवान् रवान् ॥ षट्प्रका-
रो विगंधाघोरसावपि च संस्थितः ॥१९॥ कुंभीपाकः सप्तमोयं निरयो घोरदर्शनः ॥ यो ह तैलादि-
भिर्दग्धैः घने घोरे विलोकय ॥२०॥ महापातकिनो यत्र क्वाथ्यते यमकिंकरैः ॥ बहुन्यब्दसह-
स्राणि लोन्मज्जनानिमज्जनैः ॥२१॥ वठधा दिशाभितानेतान् व्याधिकान्पश्य रौरवान् ॥
अकामात्पातकं शुष्कं कामाद्दार्द्रमुदाहृतं ॥२२॥ आर्द्रशुष्कादिभिः पापैर्द्विप्रकारानवस्थितान् ॥
चतुराशीतिसंख्याकैः एवं कर्मेदैरवस्थितान् ॥ यत्र कीर्णमपं क्रमलिनीकरणं तथा ॥ जा-
तिभ्रंशकरं तद्वदुपपातकसंज्ञितं ॥२४॥ अतिपापं महापापं सप्तधा पापकस्स्मृती ॥ एभिः सप्तसु

Indira Gandhi National
Centre for the Arts

४५ पंचत्वेनेनिरपेक्षुयथाक्रमं ॥२५॥ कार्त्तिकव्रतिभिर्यस्मात्संसर्गो ह्यभवत्तव ॥ तत्पुल्येप चयादेतेनि हता
निरयात्खलु ॥२६॥ श्रीकृष्ण उवाच ॥ इत्थं पित्वेतिनिरयात्प्रेतपक्षमथाहरत् ॥ धनेश्वरं पक्ष्लोके
पक्षश्चाभूत्सत्र हि ॥२७॥ धनदस्यानुगः सोथं धनयक्षेति संस्मृतः ॥ यदाख्यया करे तीर्थमियो
ध्यायां तु गाधिपः ॥२८॥ एवं प्रभावः खलु कार्तिकोयं मुक्तिप्रदो मुक्तिकरश्च यस्मात् ॥ प्रयात्यनेना
र्जितपातकोपि व्रतस्य संदर्शनतोपि मुक्तिं ॥२९॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये धनेश्वरो
पाख्याने सप्तविंशोध्यायः ॥२७॥ सूत उवाच ॥ इत्युक्त्वा वासुदेवोपि सत्यभामामतिप्रियां ॥
सायंसंध्यादिकं कर्तुं जगाम जननीगृहं ॥१॥ एवं प्रभावः सोत्सोयं कार्तिकः पापनाशनः ॥ विष्णुप्रिय
करो नित्यं भुक्तिमुक्तिफलप्रदः ॥२॥ यस्य कृत्वा प्राप्यते शुभिः सालोक्यादि चतुष्टयं ॥ हरिजागरणं प्रा
तःस्नानं तुलसीसेवनं ॥ उद्यापनं दीपदानं व्रतान्येतानि कार्तिके ॥३॥ पंचभिर्व्रतकैरेभिः संपूर्णो ४५

५२ श्री

कार्तिकेव्रती ॥ फलमाप्नोति तत्प्रोक्तं भुक्तिमुक्तिफलप्रदं ॥४॥ ऋषय ऊचुः ॥ विष्णुभक्तिप्रधकर्षिमहास्वेन
संयुता ॥ कार्तिकस्य विधिं सम्यक् सेतिहासोति विस्मितः ॥५॥ अवश्यमेव कर्तव्यः पापदुःखनिवारणः ॥
मोक्षार्थिभिर्नरैः सम्यक् भोगकामैरथापि वा ॥६॥ एवं स्थिते यथा कश्चिद् व्रतस्थः संकटस्थि
तः ॥ दुर्गारण्यस्थितो वापि व्याधिभिश्चापि पीडितः ॥७॥ कथं तेन प्रकर्तव्यं कार्तिकव्रतकं शुभं ॥
यस्मात्तत्फलदं मत्यं सर्वेषां नरैः ॥८॥ सूत उवाच ॥ एवमाकर्णितोयस्नतो निःसंदेह स्नतः ॥ का
न र्तिकव्रतकर्तैः कर्तव्यं तु यथा भवेत् ॥९॥ तत्सर्वं कथयिष्यामि शृणुध्वं मुनिपुंगवाः ॥ विष्णोः शिवस्य
वा कुर्यादालये हरिजागरं ॥ शिवविष्णुगृहाभावे सर्वदेवालयेष्वपि ॥ दुर्गारण्यस्थितो यश्च
द्विकापत्तो भवेत् ॥ कुर्यात्तदाश्वत्थधात्रीतुलसीमातलेष्वपि ॥ विष्णुनामप्रबंधानां गायनादि
स्तु सान्निधौ ॥१०॥ गोसहस्रप्रदानस्य फलमाप्नोति मानवः ॥ वाद्यकृत्पुरुषश्चापि वाजपेयफलान्

Indira Gandhi National Centre for the Arts

नेत्र॥११॥सर्वतीर्थावगाहोत्थंनरेस्तकःफलमाप्नुयात॥आपःतोयस्यांभोनलभेद्विदिनेपिसः॥व्याधिवो
वापुनकुर्याद्विद्विलोनामापमार्जनं॥१३॥उद्यापनविधिकर्तुमशक्तोयोव्रतेस्थितः॥ब्राह्मणान्भोजयेच्छ
क्त्याव्रतसंपूर्णहेतवे॥१४॥अव्यक्तरूपिणोविप्रेःस्वरूपंब्राह्मणाभुवि॥१५॥तत्संतुष्टासंतुष्टः
सर्वस्तस्मान्नसंशयः॥अशक्तोदीपदानेपःपरदीपंप्रबोधयेत॥१६॥तेषांवारक्षणंकुर्याद्वातादिभ्यः
प्रयत्नतः॥१७॥अभावेतुलसीनांचपूजयेद्वैष्णवंद्विजं॥१७॥यस्मात्संन्निहितोविष्णुस्वभक्ते
ष्वेवसर्वदा॥सर्वाभावेव्रतीकुर्याद्ब्राह्मणानांगवामपि॥१८॥सेवांचबोधिवटयोर्व्रतसंपूर्णहेत
वे॥ऋषयऊचुः॥कथंत्वयाश्वत्थवटौगोब्राह्मणसमोकृतौ॥१९॥सर्वेभ्यस्तरुभ्यस्तौकस्मात्पू
जतमोकृतौ॥सूतउवाच॥अश्वत्थरूपीभगवान्विष्णुरेवनसंशयः॥२०॥रुद्ररूपीवटस्तद्वत्पा
लाशोब्रह्मरूपधृक॥दर्शनंपूजनंसेवास्तेषांपापहरास्मृता॥२१॥दुःखापद्व्याधिदुष्टानां ४६

विनाशंकारणंध्रुवं ऋषयऊचुः कथंवृक्षत्वमापन्नाब्रह्माविष्णुमहेश्वराः एतत्कथयब्रह्मन्तसंशयो
न्नमहानिहिनः सूतउवाच पार्वतीशिवयोर्देवाःसुरतंकुर्वतोकिल अग्निंब्राह्मणवेषेणप्रस्थवि
घ्नंकृतपुरा ततस्तुपार्वतीक्रुद्धाशशापत्रिदिवौकसः इत्यौत्सुक्यसुखभ्रंशंकुपमानातथारुषात
पार्वत्युवाच कृमिकीटादयोप्येतज्जानंतिसुरतोसुखं तस्मात्मसुखभ्रंशात्तेवृक्षत्वमवाप्स्यथ
सूतउवाच एवंसापार्वतीदेवानशंतुकुरुमानसा तस्माद्वृक्षत्वमापन्नाब्रह्मविष्णुमहेश्वरः तस्मादि
मोविष्णुमहेश्वरात्तुभौवभवतुर्वोधिवटौमुनीश्वराः गयापुरेवोधिवटश्चपिप्पलोसश्वत्थमश्व
भवद्वटस्तदा इतिश्रीकार्तिकमाहात्म्येसत्यभामासंवादेअष्टाविंशोध्यायः ऋषयऊचुः अश्व
स्पृश्यतंकथंजातःसूतवीधतरुःस्वयं स्पृश्यत्वंचकथंमासस्तथायंशनिवासरे सूतउवाच समुद्र

Indira Gandhi National
Centre for the Arts

मथनाद्यानिरत्नाण्यापुः सुरोत्तमाः श्रियंचकौस्तुभंतेषांविष्णवेमददुःसुराः यावद्दत्तीचकारासौल
४७ क्ष्मीभार्यार्थमात्मनः तावद्दित्वाचयामासलक्ष्मीःसाचकृपाणिनं लक्ष्मीरुवाच अमुंस्तुस्यक
थंज्येष्ठांकनिष्ठापरिणीयते तस्मान्ममाग्रजांमेनाम लक्ष्मीमधुसूदन. विवाहयचमाचश्चाद्देव
धर्मः सनातनः सूतउवाच इतितद्वचनंश्रुत्वाविष्णुर्लोकस्यभावनः उद्दालकायमुनयेसुदीर्घत
पसेतदा आत्मवाक्यानुरोधेनतामलक्ष्मीददौकिल स्थूलास्याशुभ्रवदनांजरतींश्लथतीततुं सवि
तांरक्तनयनांहस्वपिंगशिरोरुहां समुनिर्विष्णुवाक्यात्तामंगीकृत्वाश्रमाश्रमे वेदध्वनिसमायुक्ते
आनयामासधर्म्मवित् होमधूमसुगंधाढ्यंवेदघोषनिनादितं आश्रमंचसमालोक्यव्यथितास्या ४७
ब्रवीदिदं ज्येष्ठोवाच नहिवासोनुरूपोयंवेदध्वनियुतोमम नाचागमिष्येभोब्रह्मंस्त्वत्रयस्वान्यत्रमां

ध्रुवं उद्दालकउवाच कथंनायासिकिंचात्रवर्त्ततेसंमतंतव तवयोग्यानवसतिः काभवेद्ब्रुवदस्वतत्
ज्येष्ठोवाच वेदध्वनिर्भवेद्यस्मिन्नतिथीनांचपूजनं यत्तद्दानादिकंयत्रनैवतत्रवसाम्यहं परस्परानु
रागेणदंपत्यंयत्रवर्त्तते पितृदेवार्चनंयत्रनैवतत्रवसाम्यहं द्यूतेदाररतायत्रयत्रद्रव्यापहारिणः
परदाररताश्चापिनतस्मान्नेरतिर्मम वृद्धसंतविप्राणांयत्रस्यादपमार्जनं निष्ठुरंभाषणंयत्रतत्र
सम्यग्वसाम्यहं सूतउवाच इतितद्वचनंश्रुत्वाविमनावदनोभवत् उद्दालकःपुनर्वाक्यंश्रुत्वाविष्णु
र्वोधितवान् यत्रतत्रास्यपूजाचतामालोक्यचसाब्रवीत् नायामीतिततःसोपिभ्रमन्नश्वेदातुरोभव
उद्दालकस्ततोवाचंतामलक्ष्मीमुवाचह उद्दालकउवाच अश्वत्थवृक्षमूलेस्मिन्नलक्ष्मीर्यंतास्रणं स्थी
आश्रमस्थानमालोक्ययावद्यास्याम्यहंपुनः सूतउवाच इतितीतत्रसंस्थाप्यजगामोद्दालकस्ततः

Indira Gandhi National
Centre for the Arts

मतीसंतीचिरंतत्रयावत्तंददर्शसा तदारुरोदकरुणंभर्त्तुंस्त्यागेनदुःखिता तत्तस्यारुदितंलक्ष्मीर्वैकु
५८ ठभवनाच्छृणोत् तदाविलापयामास विष्णुमुद्विग्नमानसा लक्ष्मीरुवाच स्वामिन्मेभगिनीज्येष्ठाभ
र्त्तृंत्यागेनदुःखिता तामाश्वासयितुंयाहिकृपालोमयघरंप्रिया सूतउवाच लक्ष्म्यासहततोविष्णु
स्तत्रागच्छत्कृपान्वितः आश्वासयन्नलक्ष्मींतामिदंवचनमब्रवीत् विष्णुरुवाच अश्वत्थस
मासाद्यसदालक्ष्मीःस्थिराभवममांशसंभवोह्येषआवासस्तन्मयाकृतः प्रसन्नंयेऽर्चयिष्यंतितां
ज्येष्ठांममधर्म्मिताः तेष्वियंश्रीः कनिष्ठास्तेसदातिष्ठत्वनामया इतिश्रीपद्मपुराणेकार्त्तिकमाहा
त्म्येज्येष्ठाकनिष्ठोपाख्यानोनामएकोनत्रिंशोध्यायः २९ ॥